CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible] Sanskrit University, [illegible] Campus, [illegible]

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्यकर्म ४१ १५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह. नं. १८ ८४७

नित्यकर्मप्रकाशिका

-कुलनिधि शर्मा

ठ्ल्प. २२
मूल्य २२/-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ ०. १६८४०

मूल्य 22/-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nityakarma-Prakāśikā
-Kulanidhi Śarman.

कुलनिधीय

नित्यकर्म प्रकाशिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नि क   श्रीगणेशायनमः   गुरुंगीर्वाणपान्नत्वानित्यकर्मप्रकाशिका॰ स्मृतिभ्यःसारमुद्धृत्यनिबध्नामिसमासतः १ अ
त्रमतुः नामुत्रहिसहायार्थंपितामातात्वतिष्ठतः नपुत्रदारानज्ञातिर्धर्मस्तिष्ठतिकेवलम्॰ आचारःपर
मोधर्मःश्रुत्युक्तःस्मार्त्तएवच॰ तस्मादस्मिन्समायुक्तोनित्यंस्यादात्मवान्द्विजइति॰ अत्रोक्तंकूर्मपुराणे॰ ब्राह्मे
मुहूर्त्तेचोत्थायधर्ममर्थंचचिंतयेत्॰ कायक्लेशंतदुद्भूतंध्यायीतमनसेश्वरम्॰ ब्राह्मोमुहूर्त्तश्च॰यदासूर्योद
यात्प्राक्चतस्रोघटिकारात्रेरवशिष्यंतेतन्मध्येश्चैघटिकाद्वयात्मकः तस्मिन्नुत्थायदक्षिणपार्श्वेणोत्ति
ष्ठेत्॰ ईश्वरमिष्टदेवं॰ तत्रविष्णुदैवतध्यानमाहव्यासः प्रातःस्मरामिभवभीतिमहार्तिशांत्येनारायणं   रामः
गरुडवाहनमंजनाभम्॰ ग्राहाभिभूतवरवारणमुक्तिहेतुंचक्रायुधंतरुणवारिजपत्रनेत्रम्॰ प्रातर्नमामि   १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनसा वचसा च मूर्ध्नां पादारविंदयुगलं परमस्य पुंसः नारायणस्य नरकार्णवतारणस्य पारायणप्रवरवि-
प्रपरायणस्य॥ प्रातर्भजामि भजनामभयंकरं तं प्राक्सर्वजन्मकृतपापभयापहत्यै॥ यो ग्राहवक्त्रपतितांघ्रि
गजेंद्रघोरशोकप्रणाशनकरो धृतशंखचक्रः २ श्लोकत्रयमिदं पुण्यं प्रातः प्रातः पठेन्नरः श्लोकत्रययु
हरस्तस्मै दद्यादात्मपदं हरिः इत्यादिपुण्यश्लोकान्स्मृत्वा भूमिं प्रार्थयेत्॥ यथा॥ समुद्रमेखले देवि स्तनमंडले पर्व-
तमंडिते॥ विष्णुपत्नि नमस्तेस्तु पादस्पर्शं क्षमस्व मे॥ इति प्रार्थ्य शौचार्थं गच्छेत्॥ तत्र दक्षः॥ शौचे यत्नः
सदा कार्यः शौचमूलो द्विजोत्तमः शौचाचारविहीनस्य समस्ताः निष्फलाः क्रिया इति॥ ततः श्वासानुसारेण
भूमौ पादं दत्वा ग्रामाद्बहिर्निर्गत्य जलपूर्णपात्रं दूरे स्थापयित्वा॥ दिवा चेदुदङ्मुख एव रात्रौ चेद्दक्षिणामुखो

यथासुखमुखो वा मौनी दक्षिणकर्णोद्धृतयज्ञोपवीतो वस्त्रेणाच्छादितशिरा दिक्ष्ववधारितदृष्टिः सूर्याग्निज
लवायुगोब्राह्मणादिमपश्यन्नगच्छन्नोत्थितस्तृणास्तृतायां कीटजलभस्मगोमयक्षेत्रमार्गादिरहितायां
भूमौ चिरं देहशुद्धिं कृत्वा अयज्ञीयशीर्णपर्णादिना गुदं प्रमार्ज्य वामपाणिना गृहीतशिश्न उत्थाय जलपूर्ण
पात्रसमीपमुपविश्य शौचं कुर्यादृतयथा· देवगृहवल्मीकमूषकगर्तान्तर्जलमार्गकुड्यभिन्नाच्छुचिदेशाच्छु
र्करादिहीनां गोरां रक्तां हरितां कृष्णां च ब्राह्मणैः क्षत्रियैर्वैश्यैः स्त्रीशूद्रैश्च क्रमेण गृहीत्वा तत्र प्रत्येकमाम
लकपरिमितां मृदं पंचवारं गुदे दशवारं वामहस्ते सप्तवारं हस्तद्वये आमणिबंधं प्रत्येकं त्रिवारं पा राम
दयोरागुल्फं जलक्षालनपूर्वकं लेपयित्वा गंधलेपक्षयकरं शौचं कुर्यात् तथा च स्मृतिः एका २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ॐ१ लिंगुदेपंचतिर्वा वामेदशोभयोः द्विसप्तपादयोस्त्रिस्तु गृहीणांशौचमुच्यतेइति· मूत्रोत्सर्गेतु एकालिंगे
करेतिस्रउभयोर्मृद्द्वयंस्मृतं· मूत्रशौचेसमाख्यातंशुक्रेतद्द्विगुणंभवेदितिवसिष्ठोक्तेर्बोध्यम्· दत्तः ए
तच्छौचंगृहस्थस्यद्विगुणंब्रह्मचारिणः वानप्रस्थस्यत्रिगुणंयतीनांचचतुर्गुणम्· यद्दिवाविहितंशौचंतद
र्धंतुनिशिस्मृतं तदर्धमातुरेप्रोक्तंमातुरस्यार्धमध्वनि· आदित्यपुराणे· स्त्रीशूद्रयोरर्धमानंशौचंप्रोक्तं
मनीषिभिः बालस्यानुपनीतस्यगंधलेपक्षयावधिमिति· इत्थंशौचंविधायद्वादशगंडूषान्कृत्वा
आचमेत्· तद्यथा· अंतर्जानुकरःकंचुकोष्णीषरहितःसोत्तरीयोनिबद्धशिखकच्छः यज्ञोपवीतीशुचिः
प्राङ्मुखउदङ्मुखोवाशुचौदेशेउपविश्यमुक्तांगुष्ठकनिष्ठकृतवामतर्जनीकरस्यशेषंब्राह्मेणतीर्थेन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नशुचिजलंर्हत्कंठतालुगामियथास्यादेवंयथाक्रमंद्विजातिभिः त्रिवारंस्त्रीशूद्राभ्यांत्वोष्ठस्पर्शियथास्या
त्तथैकवारंपीत्वाहस्तौप्रक्षाल्य अंगुष्ठमूलेन ओष्ठद्वयंद्विःप्रमार्ज्यसंहताभिस्तिसृभिरंगुलिभिर्मुखंप्र
मार्ज्य सजलतर्जन्यंगुष्ठयोगेननासारंध्रेदक्षिणोत्तरक्रमेणास्पृष्ट्वा मध्यमांगुष्ठयोगेनचक्षुषिअ
नामिकांगुष्ठयोगेनकर्णौकनिष्ठांगुष्ठयोगेननाभिं हस्ततलेनहृदयंसर्वांगुलीभिः शिरः अंगुल्यग्रैः
स्कंधौस्पृशेत् तीर्थादौपैठीनसीराह अंतरुदकमावांतोंतरेवशुध्यति बहिरुदकमाबांतोबहि
रेवशुद्धोभवति तस्मादंतरेकं बहिरेकंपादंकृत्वाआचमेत् सर्वत्रशुद्धोभवति जलांतराभावेबौ एमः
धायनः पादक्षालनशेषेणानाचमेद्धारिणाद्विजः शुद्धाभावेपिवेत्किंचित्यत्काभूमौतुतज्जलं ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आचमनासंभवेतु सर्ग्वाद्र आर्द्रंतृणंभूमिंगोमयंचोपस्पृशेदिति· मार्कंडेयपुराणेतु· कुर्यादा
चमनंस्पर्शंगोपृष्ठस्यार्कदर्शनम्· कुर्वीतालंभनंवापिदक्षिणंश्रवणंस्पृशेदिति इत्थमाचम्यप्राङ्
मुखउदङ्मुखोवादंतधावनंकुर्यात् तत्रविष्णुः प्रतिपत्पर्वषष्ठीषु चतुर्दश्यष्टमीषुच· नवम्यांभा
नुवारेचदंतकाष्ठंविवर्जयेत· उपवासेतथाश्राद्धेनकुर्याद्दंतधावनमिति· दंतकाष्ठतरुंप्रार्थयेत·
आयुर्बलंयशोवर्चः प्रजाः पशुवसूनिच· ब्रह्मप्रज्ञांचमेधांचत्वंनोधेहिवनस्पते इतिप्रार्थ्य· द्वादशांगु
लंकनिष्ठिकाग्रवत्स्थूलंसत्वचंसपत्रंहीनंव्रणकीटाग्निभिरदूषितमनूर्ध्वशुष्कं· चूर्णितांग्रंक्षी
रिकंटकिवृक्षोत्थंओष्ठस्पर्शिग्रंथिहीनंकषायकटुतिक्तान्यतमरसं अर्कमधूककोशिरीषकरं

निषिद्धा[illegible]केपौर्णमासीसंक्रांतिव्यतीपातजन्माहयज्ञव्रतशानिशुक्रभौमाह्निष्य[illegible]

जवदरीविल्वोदुंवरखदिरकदंवापामार्गकरवीरजंवूदाडिमवटतितिंडीआम्रनिंवअसनअरिमेदमालती
ककुभआम्रातकादिमवंपलाशकोविदारश्लेष्मातकतिंदुकशाकवृक्षानिगुंडीशिरवंडिवेणुशमीअश्वत्थपी
लुइंगुदगुग्गुलुवर्वुरशिग्रुमोचकशाल्मलीशरणादिवर्जितंदंतकाष्ठंगृहीत्वा॰ ॐ अन्नाद्यायव्यूहध्वं॰ सोमो
राजायमानमन् समेमुखंप्रमार्क्ष्यतेयशसाचभगेन चेति पठित्वा यावत्कुक्षिदंतधावनंमौनीविधायपा
टितनत्कुकलेनचापाल्हतिनाजिह्वोल्लेखं चक्रत्वाप्रक्षाल्यतत्स्थानं॰ निषिद्धदिनेषुअपांद्वादशगंडूषै
स्त्वरापर्णैर्वातर्जन्या नांगुलिभिर्वामुखशुद्धिःकार्याजिह्वोल्लेखःसदैवभवति ततआचमनं॰ इतिदंतधा ए.म.
वनविधिः अथस्नानविधिः तत्रफलमाहविष्णुः यास्मांहि यातनादुःखंनित्यस्नायीनपश्यति॰ नि ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यस्नानेन नश्यंते येपि पापकृता नराः तत्र जलमाह शंखः अद्भिर्गात्राणि शुध्यंति तीर्थस्नानो भवेत्फलम् नदीषु देवखा
तेषु तडागेषु सरित्सु च स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च छंदोगपरिशिष्टे धनुःसहस्राण्यष्टौ च गतिर्या
सां न विद्यते न ता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः धनुर्हस्तचतुष्कं प्रस्रवेषु निर्झरेषु विष्णुः उ
द्धृतान्भूमिष्ठमुदकं पुण्यं स्थावरात्प्रस्रवस्थं तस्मादपि साधुपरिगृहीतं सर्वत एव गांगमिति अथ
वार्तीयस्नानप्रयोगः धौते वाससि मृदो गोमयं शकं तिलसुमनस आहृत्योदकांतं गत्वा शुचौ देशे संस्था
प्य पाणी पादौ च प्रक्षाल्य कुशहस्तो बद्धशिखी उपवीत्याचम्य अद्येहेत्यादि देशकालौ संकीर्त्य श्रीना
रायणप्रीतये अस्यां नद्यामस्मिंस्तडागे वा स्नानमहं करिष्ये इति संकल्प्य ॐ उरुं हि राजा वरुण

(८ उष्णजलस्नाननिषिद्धदिनमाह मनुः मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणेति स्नानं कल्पमाह जाबालिः अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु क
र्मिणां आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः याज्ञवल्क्यः मांत्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च मानसं वारुणं चैव स्नानान्यनुक्रमात् आपोहिष्ठादिभिर्मांत्रं लेपश्च पार्थिवं आग्ने
यं भस्मना स्नानं वायव्यं रजसा गवां अर्कातपवर्षाभिः स्नानं तद्दिव्यमुच्यते वारुणं चावगाहश्च मानसं विष्णुचिंतनमिति ८

१कटिर्नाभेः पृष्ठवंशस्य च समंतात् वस्तिर्नाभेरधो भागः गुदमेढ्रयोरंतरालमिति यावत् तं तु वा गंगाम्भिवः मृदा
आलिप्य प्रक्षाल्य प्रक्षालनशब्दसामर्थ्यादद्भिरित्यर्थः अत्राचमनम् कदाचिदधस्मांग प्रक्षालनसंभव
प्रायश्चित्तशुद्ध्यर्थं वा ध्येयम् ५

अकारस्सर्वीयपंथामन्वेनवाग्रा अपदे पादा प्रतिधातवेकरुतापवक्ताहृदयाविधश्चित् नमोवरुणाया
भिष्ठितोवरुणस्यपाश इत्यनेन जलमभिमंत्र्य ॐ येतेशतंवरुणयेसहस्रंयज्ञियापाशावितता महांतः
तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतः स्वर्का इत्यनेन त्रिः प्रदक्षिणांजलमालोड्य ॐ सुमित्रिया
नआपओषधयः संतु इत्यनेनांजलिना जलमादाय ॐ दुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्वि
ष्म इत्यनेन द्वेष्यानुशत्रुकामादिदिशमत्वा तद्बहिः क्षिपेत् कटिवस्तिरुजंघाचरणकरान्मृदा त्रिःप्र
दक्षिणक्रमेण प्रक्षाल्य एकंपादंजले अपरंस्थले निधायाचमेत् ततो गंगाद्युदकं नमस्कुर्यात् १ सम:
ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् समूढमस्यपांसुरे इत्यनेन मृदंगात्रि प्रलिप्य नाभि ५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मात्रंजलंप्रविश्यसमुद्रगामिन्यांनद्यांप्रवाहाभिमुखोन्यत्रसूर्याभिमुखआपोअस्मान्मातरः शुंधयंतु
घृतेननोघृतप्वः पुनंतु विश्वं हरिप्रंप्रवहंतिदेवीरित्यनेनस्नात्वाउदिदाभ्यः शुचिरापूत एमी
तिशिलावदुन्मृज्यपुनःशरवन्निमज्यपुनःशिलावदुन्मृज्य ॐमानस्तोकेतनयेमानआयुषिमा
नोगोषुमानोअश्वेषुरीरिषः माविरान्रुद्रभामिनोवधीर्हविष्मंतः सदमित्वाहवामहे इस
नेनगोमयेनांगानिविलिप्य अष्टभिः मंत्रैर्हस्तेनप्रत्येकंशिरसिजलंप्रक्षिपेत् तेचमंत्राः ॐ
इमम्मेवरुणश्रुधीहवमद्याचमृडयत्वामवस्युराचके १ ॐतत्वायामिब्रह्मणावंदमानस्त
दाशास्तेयजमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः २ ॐत्वंनो

आपोअस्मानितिस्नात्वाउदिदाभ्यइत्युन्मज्यनिमज्योन्मज्याचम्येतिसूत्रस्यार्थः आपोअस्मानितिमंत्रेणस्नात्वामज्जित्वाउदिदाभ्यइतिमंत्रेणो
उन्मज्यनिमज्यपुनःस्नात्वाउन्मज्यचतथैवउन्मज्यआचम्यउपस्थाय गोमयेनांगंविलिप्य दंगमस्तेति इति सूत्रांतरम् ४)

दक्षिणहस्तचुलुकगृहीतेनोदकेन इमम्मे साष्टभिर्मंत्रैः प्रतिमंत्रं
मूर्धानमभिषिंचेदित्यर्थः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषांᳪसिप्रमुमु
ग्ध्यस्मत् ३ ॐ सत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्वनोवरुणᳪरराणोवी
हिमृडीकᳪसुहवोनएधि ४ मापोमौषधीर्हिᳪसीर्धाम्नोधाम्नोराजंस्ततोवरुणनोमुंच यदाहुरघ्न्या
इतिवरुणेतिशपामहे ततोवरुणनोमुंच ५ ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमᳪश्रथा
य अथावयमादित्यव्रतेतवानागसोअदितयेस्याम ६ ॐ मुंचंतुमाशपथ्यादथोवरुण्यादुत अ
थोयमस्यपड्वीशात्सर्वस्माद्देवकिल्बिषात् ७ ॐ अवभृथनिचुंपुणनिचेरुरसिनिचुंपुणः अव रामः
देवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतंपुरुराव्णोदेवरिषस्पाहि ८ ततोनिमज्योन्मज्याच ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्यत्रिभिर्ईमैर्न्नीम्यादिशिरःपर्यंतंप्राग्दक्षिरणेनपावमानैर्मंत्रैःप्रत्येकंपावयेत् तत्रमंत्राः ॐ ॐभूः ॐभुवः ॐस्वः
ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि धियोयोनःप्रचोदयात् ॐआपोहिष्ठामयोभुवस्तानऊर्जेदधातनः महे
रणायचक्षसे ॐयोवःशिवतमोरसस्तस्यभाजयतेहनः उशतीरिवमातरः ॐतस्माअरंगमामवोयस्यक्ष
यायजिन्वथ आपोजनयथाचनः ॐइदमापःप्रवहतावद्यंचमलंचयत् यच्चाभिदुद्रोहानृतंय
च्चसेपेअभीरुणं आपोमातस्मादेनसःपावमानश्चमुंचतु ॐहविष्मतीरिमाआपोहविष्मांर्
आविवासति हविष्मान्देवोअध्वरोहविष्मांअस्तुसूर्यः ॐदेवीरापोअपान्नपाद्योवऊर्मिर्हविष्य
इन्द्रियावान्मदिन्तमः तंदेवेभ्योदेवत्रादत्तशुक्रपेभ्योयेषांभागस्थस्वाहा ॐकार्षिरसिसमुद्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यत्वाक्षित्याउन्नयामि समापोअद्भिरग्मतसमोषधीभिरोषधीः ॐ अपोदेवामधुमतीरगृभ्णान्नूर्जस्वं
तीराजस्वश्चितानाः याभिर्मित्रावरुणावभ्यषिंचन्याभिरिं इमनयन्नत्यरातीः ॐ दुपदादिवमुमुचा
नः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुंधंतु मैनसः ॐ शन्नो देवीरभिष्टय आपोभवंतु
पीतये शंयोरभिस्रवंतु नः ॐ अपां रसमुद्वयसं सूर्ये संतं समाहितं अपां रसस्ययोरसः
स्तं वो गृह्णाम्युत्तमम् ॐ आपोदेवीरुपसृजमधुमतीरयक्ष्मायप्रजाभ्यः तासामास्थानादुज्जिह
तामोषधयः सुपिप्पलाः ॐ पुनंतुमापितरः सोम्यासः पुनंतुमापितामहाः पुनंतुप्रपितामहाः प्रवि
त्रेणशतायुषा ॐ पुनंतु मापितामहाः पुनंतुप्रपितामहाः पवित्रेणशतायुषा विश्वमायुर्व्यश्न

रामः ८

२ पयाभगहितोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्राजुष्टतमम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वे १७ ॐ अग्न आयूंषि पवस आसुवोर्जमिषं च नः आरे बाधस्व दुच्छुनाम् १८ ॐ पुनन्तु मा देवजनाः पुनं
तु मनसा धियः पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा १९ ॐ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् अग्ने
क्रत्वा क्रतूँ१ रनु २० ॐ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ब्रह्म तेन पुनातु मा २१ ॐ पवमानः सो अद्य नः प
वित्रेण विचर्षणिः यः पोता स पुनातु मा २२ ॐ उभाभ्यां देव सवितः पवित्रेण सवेन च मां पुनीहि विश्व
तः २३ ॐ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः तया मदन्तः सधमादेषु वयं स्या
म पतयो रयीणां २४ ॐ चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण
सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् २५ ॐ २६ ॐ भूः ॐ भुवः २७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अंतर्जले पमर्षणं त्रिरावर्तयेत् अंतर्जले जलमध्ये निमग्नो घमर्षणम् ऋतं च सत्यं चेति त्रिवारमावर्तयेत् अनु द्रुपदां जपेत् द्रुपदां वा यं गोरितिऋचं प्राणायामं वा स शिरसि ओं मिति वा विष्णोर्वा स्मरणम् यद्वा द्रुपदादिवेत्यादिकामृचं आयंगोरित्यादिकं वा ऋचं प्राणायामं वा कथंभूतं सशिरसं सह शिरसा वर्तमानं आपो ज्योतीरितिमंत्रः शिरः अनेनाशिरसा रहितोपि प्राणायामोस्तीति गम्यते ओंमितिवा अंतर्जले त्रिरावर्तयेदित्यन्वयं गः अत्र तेषां पक्षाणां भक्तिश्रद्धापेक्षया विकल्पः उत्तमाधिकारिणां प्रत्यहा विष्णोर्वा स्मरणं विष्णोः परमात्मस्वरूपेण सर्वव्यापकस्य स्मरणं ध्यानं वा कुर्यादिति

ओं स्वः ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् पुनः इमम्मे इत्यादिभिरष्टभिर्मंत्रैः पूर्ववदभिषेकः ततो जले मग्नः सन् ऋतं च सत्यं चेत्य घमर्षणसूक्तं वा पूर्वोक्तद्रुपदादिवेत्यादिकमृचत्रयं वा आयंगो इत्यादिकमृचत्रयं वा ओं कारं वा त्रिरावर्तयेत् वक्ष्यमाणप्राणायामं वा कुर्यात् विष्णवे नम इति विष्णुं वा स्मरेत् एतेषां शक्तिश्रद्धापेक्षया विकल्पः एतावत्कर्तुमशक्तः संकल्पानंतरं गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधु कावेरि जलेस्मिन् संनिधिं कुरु इति मंत्रेणांकुशमुद्रया सूर्यमंडलात्तीर्थान्यावाह्य ओं अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे उद्धृतासि वराहेण कृष्णेन शत बाहुना मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतमिति अंगानि मृदा लिप्य आपो हि ष्ठेति तिसृभिर्मार्जे

स्नाः ८

आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन ॥ महे रणाय चक्षसे ॥ १ ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः। तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः। ३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं कृत्वा पूर्ववद घमर्षणं च कृत्वा ॐ नमो नारायणायेति मंत्रेण त्रिर्मज्जेदिति एवं स्नात्वा शिरोनानुवधुनेन्नो
गेभ्यस्तोयमुद्धरेत् नतैलवसे स्पृशेत् नम्लेच्छान्त्यज पतितैः संभाषणं कुर्यात् ततो धौतेवाससी परिधाय
स्नानवस्त्रमविगुणितं जलाद्बहिर्निष्पीडयेत् बाल्यवार्धक्यातुरतया वहिर्गंतुमशक्तो गृहेऽपि तप्तोदकेना
पि सशिरस्कमपि स्नायात् स्वांगेभ्यस्तोयमुद्धरेत् एतावदप्यति बाल्यवार्द्धक्यातुरया कर्तुमशक्तश्चेद्दंतधा
वनांतं कृत्वा पूर्वोक्तस्नानानुकल्पविधिं विधाय धौते वाससी परिधाय तिलकं विधाय संध्यादावधिकारी स्या
त् इति स्नानविधिः अथ तिलकधारणं तत्र गंगामृच्चंदनभस्मादिना विष्णुशिवनामोच्चारणपूर्व
कं कुर्यात् अथ वैष्णवरीत्या तिलकधारणप्रयोगः तत्र द्वारिकाया गंगाया वा मृदं चंदनं वा वामहस्ते समा

(ब्रह्माण्डपुराणे ऊर्ध्वपुंड्रं मृदा कुर्यात्त्रिपुंड्रं भस्मना सदा तिलकं वै द्विजः कुर्याच्चंदनेन यदृच्छया ऊर्ध्वपुंड्रं द्विजः कुर्यात् क्षत्रियस्त्रिपुंड्रकं अर्धचंद्रं तु वैश्यस्य वर्तुलं शूद्र
जातिषु इति २

दायनत्रमूलंमंत्रंलिखित्वा· ॐकेशवायनमइतिललाटेगदाकारमूर्द्धपुंड्रंकुर्यात्· ॐनारायणायनमइतिउ
दरे ॐमाधवायनमोहृदये· नंदाख्यखड्गाकारं· ॐनमोगोविंदायनमःकण्ठे ॐविष्णवेनमोदक्षिणपार्श्वे
ॐमधुसूदनायनमोदक्षिणवाहौ शंखाकारं ॐत्रिविक्रमायनमोदक्षिणकर्णे· ॐवामनायनमोवामपा
र्श्वे ॐश्रीधरायनमोवामवाहौचक्राकारं· ॐहृषीकेशायनमोवामकर्णे· ॐपद्मनाभायनमःपृष्ठे· ॐ
दामोदरायनमःककुदि। ॐवासुदेवायनमोमूर्द्ध्निशार्ङ्गधनुषोवाणानांचाकारंकुर्यात् इतितिलकधारण
विधिः अथसंध्याविधिः तत्रफलमाहयमः संध्यामुपासतेयेतुसततंसंशितव्रताः विधूतपापास्तेयां रामः ९
तिब्रह्मलोकंसनातनमिति· कालमाहसंवर्त्तः प्रातःसंध्यांसनक्षत्रांमध्यमांस्नानकर्मणि सादित्यांपश्चि

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मांसंध्यामुपासीतयथाविधि उत्तमातारकोपेतामध्यमालुप्तभास्करा अधमासूर्यसहिताप्रातःसंध्यात्रिधाम
ता उत्तमासूर्यसहितामध्यमालुप्तभास्करा अधमातारकोपेतासायंसंध्यात्रिधामतेति देवमाहशातात
पः गृहेस्वप्राकृतीसंध्यागोष्ठेशतगुणात्मिका नदीषुशतसाहस्रीअनंताशिवसन्निधौ प्राकृतीएकगुणा
व्यासश्चाह बहिःसंध्यादशगुणागोष्ठप्रस्रवणादिषु खाततीर्थेशतगुणासाहस्रीजाह्नवीजले अन्यान्ये
पिपुण्यदेशातुलसीबिल्वाश्वत्थामलकमूलनदीसंगमपर्वतमस्तकोद्यानादयोयोगिनीहृदयादिष्वपू
हनीयाः पीठमुक्तंतंत्रसारे काम्यार्थकंवलं चैवश्रेष्ठंचरक्तकंवलम् कृष्णाजिनेज्ञानसिद्धिर्मोक्षस्तु
व्याघ्रचर्मणि कुशासनेमंत्रसिद्धिर्नात्रकार्याविचारणा धरण्यांदुःखसंभूतिर्दौर्भाग्यंदारुजासने वं

देवलः दानमाचमनं होमं भोजनं देवतार्चनं। प्रौढपादो न कुर्वीत स्वाध्यायं च विशेषतः। आसनारूढपादस्तु जानुनोर्जंघयोस्तथा। कृत्वावसक्थिको यस्तु प्रौढपादः स उच्यते इति॥५

शासने दरिद्रः स्यात्पाषाणे व्याधिपीडनं। तृणासने यशोहानिः पल्लवे चित्तविभ्रमः। जपध्यानतपोहानिं व
स्त्रासनं करोति हि। वस्त्रासनं केवलवस्त्रासनं। अत्राविशेषेपि संध्यायां कुशासनस्य मुख्यत्वं ग्रंथांतराद्बो
ध्यम्। आसनमुक्तं मंत्रमहोदधौ। पद्मं स्वस्तिकविकटे कुक्कुटं वज्रभद्रके। शांत्यादिषु प्रकुर्वीत क्रमादासन
मुत्तमम्। अत्राविशेषेपि संध्यायाः शांतिरूपत्वात्पद्मासनस्य मुख्यत्वं। यत्र पद्मासनं न कृतं तत्राप्यंतर्जानु
करणं त्वावश्यकमित्याह पराशरः। भोजनं हवनं दानमुपहारः प्रतिग्रहः। बहिर्जानुर्न कार्याणि तद्वदाचमनं रामः
विदुरिति। प्रागादिदिङ्मुखकरणमाह वाचस्पतिः। प्राक्पश्चिमोदगास्यस्तु प्रातःसायंनिशासु चेति। अत्रा १०
विशेषेपि प्रातःसंध्यावसरे ऐशान्यभिमुखकरणं तु शिवपूजनस्योत्तराभिमुखकरणं त्वे ग्रंथांतराद्बो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यम् वाससोर्धारणेविशेषमाहभृगुः नग्नःस्यान्मलवद्वासा नग्नःकौपीनकेवलः द्विकच्छोनुत्तरीयश्च अकच्छो
वस्त्रएवच नग्नःकषायवासास्यात्नग्नश्चार्द्रपटःस्मृतः नग्नोद्विगुणवस्त्रःस्यान्नग्नोरक्तपटःस्मृतः नग्नस्तुस्ति
ग्धवस्त्रःस्यान्नग्नःस्नानपटस्तथा नारसिंहपुराणेपि नरक्तमुल्बणंवासोननीलंचप्रशस्यते मलाक्तंचदशा
हीनंवर्जयेदंबरंबुधः उल्बणंस्पष्टं तच्चरक्तविशेषणं कुशधारणमाहसुमंतुः समूलाग्रौविगर्भौतुकु
शौद्वौदक्षिणेकरे सव्येचैवतथात्रीन्वैबिभृयात्सर्वकर्मसु कुशास्तुकल्पमाहसएव कुशाःकाशाःशरो
गुंद्रोपवाद्दूर्वाथबल्वजाः गोकेशमुंजकुंदाश्च पूर्वाभावेपरःपरः काशादौविशेषमाहशंखः काशहस्त
स्तुनाचामेत्कदाचिद्विधिशंकया प्रायश्चित्तेनयुज्येत दूर्वाहस्तस्तथैवच काशाद्यभावेप्याहलघुहारीतः

(अपवित्रकरोनग्नःशिरसिप्रावृतोपिवा प्रलपन्योजपेत्तावत्तावन्निःफलमुच्यते इतिनारदपंचरात्रे६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुशधारणरीतिमाह शंखः मूलपर्वणि कुर्वाणो महत्साहायते क्रिया· मध्यपर्वणि कुर्वाणः पुत्रदारैर्वियुज्यते· अनामिकाग्रपर्वस्थं पवित्रं विभृयात्सदा· सुवर्णादिषु याज्ञवल्क्यः अना
मिकाधृतं हेम तर्जन्यां रूप्यमेव च कनिष्ठिकाधृतः खड्गस्तेन पूतो भवेन्नरः इति ३

जपे होमे तथा दाने स्वाध्याये पितृतर्पणे अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैः अत्राविशेषेपि संध्यायां कु
शधारस्यावश्यकत्वमाह स एव दर्भहीना तु या संध्या यच्च दानं विनोदकम् असंख्यातं तु यज्जप्तं तत्सर्वं नि
ष्फलं भवेदिति अथ शिखाबंधनं सप्रणवव्याहृतिगायत्र्या ॐ ब्रह्मवादिसहस्रेण शिववादिशतेन च· वि
ष्णोर्नामसहस्रेण शिखाबंधं करोम्यहमित्यनेन वा कुर्यात् आचमनं पूर्वोक्तरीत्या कुर्यात्· तत्र वैष्णवमंत्राः
ॐ केशवाय नमः ॐ नारायणाय नमः ॐ माधवाय नमः इति त्रिभिर्मंत्रैस्त्रिः पीत्वा· ॐ गोविंदाय नमः ॐ विष्णु वे नमः इति करौ प्रक्षाल्य· ॐ त्रिविक्रमाय नमः ॐ मधुसूदनाय नम इत्यंगुष्ठमूलेनोष्ठद्वयं प्रमार्ज्य· ॐ
संकर्षणाय नम इति संहिताभिस्तिसृभिस्तर्जन्याद्यंगुलीभिर्मुखं ॐ वासुदेवाय नमः ॐ प्रद्युम्नाय नमः

रामः
११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतितर्जन्यंगुष्ठाभ्यामेवदक्षिणावामनासिके ॐ अनिरुद्धायनमः ॐ पुरुषोत्तमायनमइतिअनामिकांगुष्ठा
भ्यांनेत्रे ॐ अधोक्षजायनमः ॐ नृसिंहायनमइतिअनामिकांगुष्ठाभ्यामेवकर्णौ ॐ अच्युतायनमइति
कनिष्ठिकांगुष्ठाभ्यांनाभिं जनार्दनायनमइतिपाणितलेनहृदयं ॐ उपेन्द्रायनमःसर्वांगुलीभिर्मूर्धानं०
ॐ हरयेनमः ॐ विष्णवेनमइतिसर्वांगुल्यग्रैःस्कंधावुपस्पृशेदितिवैष्णवाचमनविधिः अथस्मार्ताचम
नविधिः ॐ ऋग्वेदायस्वाहा ॐ यजुर्वेदायस्वाहा ॐ सामवेदायस्वाहा इतित्रिभिर्मंत्रैस्त्रिःपीत्वा ॐ
अथर्ववेदायनमइतिकरौप्रक्षाल्य नृम्णिं अंगुष्ठमूलेनद्वौष्ठद्वयंप्रमार्ज्य वाकइतिमंत्रेणसंहिताभिस्ति
सृभिस्तर्जन्याद्यंगुलीभिर्मुखमुपस्पृश्य प्राणाइतिसजलतर्जन्यंगुष्ठयोगेननासारंध्रेदक्षिणोत्तरक्रमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गास्पृष्ट्वा चक्षुरितिमध्यमांगुष्ठयोगेनचक्षुषी श्रोत्रमितिअनामिकांगुष्ठयोगेनकर्णौ· त्वक्षीकनिष्ठां
गुष्ठयोगेननाभिं हस्ततलेनहृदयं सर्वांगुलीभिःशिरः अंगुल्यग्रैःस्कंधौस्पृशेत् इतिस्मार्ताचमनविधिः अ
थसंध्याप्रयोगः करसंपुटंकृत्वा ॐपुण्डरीकाक्षायनमइतिपठेत् ॐपृथ्वित्वयाधृतालोकादेवित्वंविष्णु
नाधृता त्वंचधारयमांदेवि पवित्रंकुरुचासनमिति सजलकुशपाणिनाआसनमुपस्पृशेत् अद्येहोपा
त्तसकलदुरितक्षयायब्रह्मवाप्त्यैप्रातःसंध्योपासनमहंकरिष्ये इतिसंकल्प मूर्द्धानंमभिषिंचेत् ॐभूःपु
नातु ॐभुवःपुनातु ॐस्वःपुनातु ॐमहःपुनातु ॐजनःपुनातु ॐतपःपुनातु ॐसत्यंपुनातु ॐ राम: १२
तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि धियोयोनःप्रचोदयात् पुनातु अथांगुलिन्यासः ॐअंगुष्ठाभ्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमः ॐभुवस्तर्जनीभ्यान्नमः ॐस्वःमध्यमाभ्यांनमः ॐतत्सवितुर्वरेण्यं अनामिकाभ्यान्नमः ॐभर्गोदेवस्य
धीमहिकनिष्ठिकाभ्यान्नमः ॐधियोयोनःप्रचोदयात्करतलकरपृष्ठाभ्यान्नमः अथषडंगन्यासः ॐ
भूःहृदयायनमः ॐभुवःशिरसेस्वाहा ॐस्वःशिखायैवषट् ॐतत्सवितुर्वरेण्यंकवचायहुं ॐभर्गोदेव
स्यधीमहिनेत्रत्रयायवौषट् ॐधियोयोनःप्रचोदयात् अस्त्रायफट् अथप्रणवन्यासः ॐअकारंनाभौ
ॐउकारंहृदये ॐमकारंमूर्ध्नि अथावाहनं ॐगायत्रीत्र्यक्षरांबालांसाक्षसूत्रकमंडलुं रक्तवस्त्रांचतुर्व
क्त्रांहंसवाहनसंस्थितां ब्रह्माणींब्रह्मदेवत्यांब्रह्मलोकनिवासिनीं ऋग्वेदकृतोत्संगां सांख्यायसनगो
त्रजां आवाहयाम्यहंदेवींगायत्रींसूर्यमंडलात् आगच्छवरदेदेवित्र्यक्षरेब्रह्मवादिनि गायत्रिछंदसां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

+ वामनासापुटेनवायोरादानकाले पूरकनामाप्राणायामः तत्रश्यामंचतुर्भुजंविष्णुंनाभौध्यायेत् अंगुष्ठानामिकाकनिष्ठिकाभिर्नासापुटद्वयंनिरुध्य + ६

मातव्रह्मयोनेनमोस्तुते प्रणवस्यब्रह्माऋषिः परमात्मादेवतागायत्रीछंदः सर्वकर्मारंभेविनियोगः सप्तव्याहृ
तीनांयथाक्रमंविश्वामित्रजमदग्निभरद्वाजगौतमात्रिवशिष्ठकश्यपाऋषयः अग्निवायुसूर्यबृहस्पतिवरुणे
न्द्रविश्वेदेवादेवतागायत्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुप्जगतीछंदांसि तत्सवितुरितिविश्वामित्रऋषिः सवि
तादेवतागायत्रीछंदः आपोज्योतिरितिप्रजापतिऋषिर्ब्रह्माग्निवायुसूर्यादेवताअनुष्टुप्छंदः प्राणायामेविनियो
गः ॐ नमोभगवतेवासुदेवायइत्यात्मनः प्रदक्षिणामुदकंक्षिपेत् संमीलितनयनोमौनीचसन् प्राणाया राम:
मत्रयंकुर्यात् तत्रांगुष्ठेनदक्षिणनासापुटंनिरुध्य वायोर्धारणकालेकुंभकः तत्रकमलासनंरक्तवर्णंच १३
तुर्भुजंरक्तवर्णंब्रह्माणंहृदयेध्यायेत् कनिष्ठानामिकाभ्यांवामनासापुटनिरोधेदक्षिणनासापुटेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वायोस्त्यागकाले रेचकः तत्रश्वेतं त्रिनयनं रुद्रं ललाटे ध्यायेत् ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ आपो ज्योतिरसोमृतं ब्रह्म भूर्भुवः स्वरोम् इति प्राणा
यामत्रयं कुर्यात् ततः करे चुलुकोदकं गृहीत्वा ॐ सूर्यश्च मा मन्युश्च मा मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्ष
न्तां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किञ्चिद्दुरितं मयि इद
महं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा इत्याचम्य पुनर्द्विराचमेत् अथ जलाशयस्थैः स्वर्णादिपात्र
स्थैर्वा जललेशैरापो हिष्ठा इत्यादिभिः शिर आदिमार्जनं यथा सेसथत्रयमाकाशे वरवत्रीणि मस्तके नवा
रान्क्षिपेद् मा वापो हिष्ठेति मार्जनम् भूमिशब्देन चरणौ वा काशो हृदयं स्मृतम् शिरस्येव शिरः शब्दो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मार्जनञ्जैरुद्दालकः अञ्आपोहिष्ठेत्यादि सप्त पादै आपोजन्नयथेत्यंतिमपादेन चशिरस्येव यस्यक्षयायेत्यष्टमपादे
नभूमावेवेतिनुसंप्रदायः तत्रमंत्राः ॐआपोहिष्ठामयोभुवः ॐतानउर्जेदधातनः ॐमहेरणायचक्षसे ॐयो
वःशिवतमोरसः ॐतस्यभाजयतेहनः ॐउशतीरिवमातरः ॐतस्माअरङ्गमामवः ॐयस्यक्षयायजिन्वथ
ॐआपोजनयथाचनः अथ ॐसुमित्रियानआपोओषधयःसंतुइत्यनेनजलमादाय ॐदुर्मित्रियास्तस्मैसं
तुयोस्मान्द्वेष्टियंचवयंद्विष्मइत्यनेनजंतुहीनेस्थलेनिःक्षिप्येत् पुनर्जलमादायनासायांयोजयित्वापाप्मा
ननिरस्य ॐद्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव पूतंपवित्रेणेवाज्यमापःशुंधंतुमैनसः इत्यने राम:
नशिरोभिषिंचेत् अस्यप्रसंसामाहबौधायनः द्रुपदादिवमुमुचानेत्यातामृतंत्रिरंतर्जले पठन्सर्वस्मात्पा १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पात्प्रमुच्यते इति याज्ञवल्क्यः द्रुपदानामंत्रं वेदे वाजसनेयके अंतर्जले त्रिरावर्त्य सर्वपापैः प्रमुच्यते इत्युक्तेः पुनश्च
जलमादाय नासायां योजयित्वा ॐ ऋतंच सत्यंचाभिद्धात्तपसोध्यजायत ततोरात्र्यजायत ततः समुद्रोअर्
र्णवः समुद्रादर्णवादधि संवत्सरोअजायत अहोरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचंद्रमसौ धाता
यथापूर्वमकल्पयत् दिवंच पृथिवींचांतरिक्षमथो स्वः इति मृमोक्षिपेत् अघमर्षणो योगी याज्ञवल्क्यः हत्वा
लोकानिमान्हिंस्रो यः पठेदघमर्षणम् यथाश्वमेधावभृथमेवं तन्मनुरब्रवीत् स्नानमब्दैवतैर्मंत्रैर्मार्ज
नं प्राणसंयमः अघमर्षणसूक्तेनाश्वमेधावभृथं समश्नुते अथोत्थाय सप्रणवव्याहृतिगायत्र्या सूर्याभि
मुखमंजलित्रयं क्षिप्त्वा गायत्र्यैव प्रदक्षिणां कृत्वा उदकेन नासाचक्षुः कर्णस्पर्शनं कृत्वा उत्थितः सूर्यमुप

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिष्ठेत् तद्यथा भूम्यलग्नगुल्फतलभागो वा भूम्यलग्नचरणार्द्धभागो वा भूमिलग्नैकचरणो वा हस्ताभ्यांस्व
स्तिकं कृत्वा प्रातस्तिष्ठेद्दिवाकरं मध्याह्ने तु ऊर्ध्वबाहुः सायं मुकुलितौ करौ इत्युक्तः मन्त्रैः सूर्योपस्थानं कुर्यात् तन्मन्त्रं
आः ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॐ उदु त्यं जातवेदसं देवं व
हन्ति केतवः दृशे विश्वाय सूर्यम् ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अं
तरीक्षं ७ सूर्य आत्मा जगतस्तस्थुषश्च ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं रम्यः
रदः शतं ७ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ततश्चा १५
दित्यमण्डलगतां गायत्रीं ध्यायेत् श्वेतां श्वेतकौशेयवस्त्रां श्वेतमाल्यानुलेपनालंकारभूषितां पद्मासनगतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साक्षसूत्रकरां ध्यात्वा आवाहयेत् ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवय
जनमसि इत्यावाह्य प्रार्थयेत् गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीया
य दर्शताय पदाय परोरजसे सावदोमा प्रापत् विश्वामित्र ऋषिः सविता देवता गायत्री छंदः शुक्लो वर्णः
अग्निर्मुखं ब्रह्मा शिरः विष्णुर्हृदयं रुद्रः कवचं सांख्यायनसगोत्रं अमुकसंख्यया जपे विनियोगः अथ ज
पः सुवर्णमणिमुक्ताफलस्फटिकरुद्राक्षतुलसीकुशाग्रं यथादि निर्मितया वस्त्रांतरितया मालया वस्त्रांतरि
तहस्तेन वा प्रत्येकं दिङ्मुखः सूर्याभिमुखो वा देवतां ध्यायन् जपं कुर्यात् ततः करसंपुटं कृत्वा देवागातुविदोगा
तुं वित्वा गातुमित देवयज्ञं स्वाहा वाते धा इत्यनेन गायत्रीं विसर्जयेत् ततः करे जलमाद

(प्रातर्नाभौ करौ कृत्वा मध्याह्ने हृदये स्थितः सायं मुखसमीपे तु एष जप्यविधिः स्मृतः कृत्वोत्तानौ करौ प्रातः सायं चाधोमुखौ करौ मध्ये तु कराभ्यां तु जपन्याप्रदीरितः ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

य अनेनामुकसंख्याकेन गायत्रीजपेन प्रातःसंध्यांगभूतेन भगवान्ब्रह्मस्वरूपी सविताप्रीयतानु इत्यनेन जपंनि
वेदयेत् ततउत्तरेशिखरेजाताभूम्यांपर्वतवासिनी ब्राह्मणेभ्योह्यनुज्ञातागच्छदेवियथासुखम् इत्यनेनसंहारमु
द्रयासंध्यांविसर्जयेत् ततआचमेत् इतिप्रातःसंध्याविधिः अयमेवविधिःसंकल्पाचमनार्घोपस्थानजप
निवेदनादिकंविहायमध्याह्नसंध्यादौबोध्यः अथउत्थायांबुमिश्राणिपुष्पाणिऊर्ध्वंक्षिप्त्वाऊर्ध्वबाहुःसूर्यमुप
तिष्ठेत् तत्रमंत्राः उद्वयमित्यादिसर्वोक्तश्चत्वारः गायत्री विभ्राडित्यादिसप्तदशसहस्रशीर्षेत्यादिषोडशय
ज्जाग्रतइत्यादिषट् मंडलब्राह्मणंच यदेतन्मण्डलमित्यादित्रयोविंशतिकंडिकाः एवमुपस्थाय एकं रामः
चक्रंरथेयस्यदिव्यंकनकभूषितं समेभवतुसुप्रीतपद्महस्तोदिवाकर इतिसूर्यंनत्वाकुशेषूपविशेत् अथ १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तर्पणपरिभाषा तत्रयोगियाज्ञवल्क्यः ब्रह्मादीनुपवीतीतुदेवतीर्थेनतर्पयेत् निवीतिकायतीर्थेनमनुष्या
न्सनकादिकान् पद्मपुराणे देवान्ब्रह्मऋषीन्सर्वान्स्तर्पयेदक्षतोदकैः अत्राक्षतपदं यवपरं यवा स्तर्पये
देवानित्यन्यत्रदर्शनात् अपसव्यंततःकृत्वासव्यंजानुचभूतले इत्युपक्रम्य तर्पयेत्तुपितॄन्भक्त्यासतिलोद
कचन्दनैः इत्युपसंहृतं योगियाज्ञवल्क्योपि दक्षिणोपितृतीर्थेनजलंसिंचेद्यथाविधि यमः त्रीन्त्रीनंजलीं
जलीन्दद्यादुच्चैस्तुच्चतनंततः गोश्रृंगमात्रमुद्धृत्यजलमध्येजलंक्षिपेत् शंखः विनारूप्यसुवर्णेनविनाता
म्रतिलैस्तथा विनादर्भैश्चमंत्रैश्चपितॄणांनोपसर्पति स्मृत्यंतरे मुक्तहस्तंतुदातव्यंमुद्रांतत्रनदर्शयेत्
मुद्रा तर्जन्यंगुष्ठयोगेनपितृतीर्थावरोधरूपा योगियाज्ञवल्क्यः यद्युद्धृतंप्रसिंचेद्वै तिलान्संमिश्रयेज्जले

(व्यासः एकैकमंजलिंदेवा द्वौद्वौतुसनकादयः अर्हंतिपितरःस्त्रीन्स्त्रीनुस्त्रियएकैकांजलिमिति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ले· ऽनेनान्यद्यदि सव्येन तिला ग्राह्या विचक्षणैः अस्यार्थः यद्युद्धृतोदकमादाय तर्पणं करोति तदा जले तिलाः प्र
क्षेप्तव्याः यदा तु जलाशयस्थजलमादाय तदा वामहस्तेन तिला ग्राह्याः पात्राद्वा जलमादाय शुभे पात्रान्तरे क्षि
पेत् जलस्पर्शेन तथा गर्त्तेन स्थलेन न वहिर्विरतिकार्ष्णाजिनैः हेमरूप्यमयं पात्रं ताम्रकांस्यसमुद्भवं पितॄणां त
र्पणे पात्रं मृण्मयं तु परित्यजेत् देवतानां पितॄणां च जले दद्याज्जलाञ्जलिं असंस्कृतप्रमीतानां स्थले दद्यात्
जलाञ्जलिम् अत एव वस्त्रनिःपीडितोदकमपि स्थल एव दीयते तिलतर्पणनिषेधमाह मरीचिः सप्तम्यां
रविवारे च गृहे जन्मदिने तथा निशासन्ध्यासु पुत्रार्थी न कुर्यात्तिलतर्पणम् अत्र भौमभुक्तत्रयोदशीनन्दाम रामः
घादिषु विवाहवर्षे चुडोपनयनवरम्मासे च्चडात्रिमासे नान्दीमुखैकमासे च तिलतर्पणनिषेध ऊहनीयः अ ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वापवादः पृथ्वीचंद्रोदये तीर्थेतिथिविशेषेषु गंगायां प्रेतपक्षके निषिद्धेपिदिनेकुर्यात्तर्पणं तिलमिश्रितं
अथतर्पणप्रयोगः शुद्धासने पूर्वाभिमुखोपविष्ट उपवीति अद्येहो पात्तसकलदुरितक्षयाय ब्रह्मादीनां
देवर्षिमनुष्यपितॄणां स्वपितॄणांच तर्पणमहं करिष्ये इति संकल्प्य ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इहागच्छ
न्तु इहतिष्ठन्तु गृह्णंत्वेतान्जलांजलीन् इत्यावाह्य देवेनतीर्थेन प्रतिमंत्रमेकैकं यवमिश्रं जलांजलिं द
द्यात् ॐ ब्रह्मास्तृप्यतां ॐ विष्णुः० ॐ रुद्रः० ॐ प्रजापतिः० ॐ देवाः० ॐ छंदांसि० ॐ वेदाः० ॐ ऋ
षयः० ॐ पुराणाचार्याः० ॐ गंधर्वाः० ॐ इतराचार्याः० ॐ संवत्सरः सावयवः० ॐ देव्यः० ॐ अप्सरसः०
ॐ देवानुगाः० ॐ नागाः० ॐ सागराः० ॐ पर्वताः० ॐ सरितः० ॐ मनुष्याः० ॐ यक्षाः० ॐ रक्षांसि०

कठाः कण्वाश्च जाबालास्तथा वाजसनेयिनः ॥ निषिद्धेपि दिने कुर्युस्तर्पणं तिलमिश्रितम् ॥ (?)

ॐ पिशाचाः० ॐ सुपर्णाः० ॐ भूतानि० ॐ पशवः० ॐ वनस्पतयः० ॐ ओषधयः० ॐ भूतग्रामश्चतुर्विधः०
ततउत्तराभिमुखोनिवीती ॐ भूर्भुवःस्वःसनकादयःसप्तमनुष्याइहागच्छन्त्विहतिष्ठन्त्वेतान्जलांजलीनित्यावा गृह्णन्तु २
त्य मनुष्यतीर्थेनयवमिश्रोदकेनअंजलीदद्यात् ॐ सनकस्तृप्यतां २ ॐ सनन्दनः २ ॐ सनातनः २ ॐ कपि
लः२ ॐ आसुरिः २ ॐ वोढु २ ॐ पंचशिखः २ ततोदक्षिणाभिमुखोपसव्यंविधाय वामजानुनिपात्य
ॐ भूर्भुवःस्वःकव्यवाडनलादयःसप्तदिव्यपितरइहागच्छन्तुइहतिष्ठन्तुगृह्णन्त्वेतान्जलांजलीनित्यावात्य रामः
स्वकृपात्रमादाय पितृतीर्थेनद्विगुणदर्भतिलमिश्रितान्त्रीन्त्रीन्अंजलीन्दद्यात् ॐ कव्यवाडनलः १८
तृप्यताम् ३ ॐ सोमः ३ ॐ यमः ३ ॐ अर्यमा ३ ॐ अग्निष्वात्ताः ३ ॐ सोमपाः ३ ॐ बर्हिषदः ३ ॐ भूर्भु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वः स्व धतुर्दशयमा इहागच्छंत्विहतिष्ठंतु गृह्णंत्वेतान् जलांजलीन् ॐ यमाय नमः ३ ॐ धर्मराजाय० ॐ मृत्यवे ३ ॐ अंत
काय ३ ॐ वैवस्वताय ३ ॐ कालाय ३ ॐ सर्वभूतक्षयाय ३ ॐ औदुंबराय ३ ॐ दध्नाय ३ ॐ नीलाय ३ ॐ परमेष्ठि
ने ३ ॐ वृकोदराय ३ ॐ चित्राय ३ ॐ चित्रगुप्ताय ३ जीवत्पितृक एतावदेव तर्पणं कुर्यात् मृतपितृकस्तु
ॐ भूर्भुवः स्व अस्मत्पितर इहागच्छंत्विहतिष्ठंतु गृह्णंत्वेतान् जलांजलीन् इत्यावाह्य ॐ उदीरतामवर उत्परा
स उन्मध्यमाः पितरः सोम्यासः असुंय ईयुरवृका ऋतज्ञास्ते नोवंतु पितरोहवेषु १ अंगिरसो नः पितरो नव
ग्वा अथर्वाणो भृगवः सोम्यासः तेषां वयं० सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम २ आयंतु
नः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन् यज्ञे स्वधया मदंतोधिब्रुवंतु तेवंत्वस्मान् ३ एता

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्मंत्रान्प्रसिंचन्पठित्वा अद्येह अमुकनाम्नसंवत्सरे अमुकायने अमुकर्त्तौ अमुकमासे अमुकपक्षे अमुकस्यां
तिथौ अमुकगोत्रोऽस्मत्पितावसुस्वरूप अमुकशर्मा तृप्यताम् ३ तृप्यध्वम् ३ इदंजलंसतिलंतस्मैस्वधानमः ॐ
ऊर्ज्जंवहन्तिरमृतंघृतंपयःकीलालंपरिस्रुतम् स्वधास्थतर्पयतमेपितॄन् १ ॐपितृभ्यःस्वधायिभ्यःस्वधा
नमः पितामहेभ्यःस्वधायिभ्यःस्वधानमः प्रपितामहेभ्यःस्वधायिभ्यःस्वधानमः अक्षन्पितरोमीमदंतपित
रोतीतृपन्तपितरःपितरःशुंधध्वम् २ येचेहपितरोयेचनेहयांश्चविद्मयांरंउचनप्रविद्म त्वंवेत्थयतितेजा राम:
तवेदःस्वधाभिर्यज्ञ९०सुकृतंजुषस्व २ एतान्प्रसिंचन्पठित्वा अद्येहेत्यादि अमुकगोत्रोऽस्मत्पिता १९
महोरुद्रस्वरूप अमुकशर्मा तृप्यतां ३ तृप्यध्वम् ३ इदंजलंसतिलंतस्मैस्वधानमः ॐमधुवाताऋतायते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मधुक्षरंतिसिंधुवः माध्वीर्नःसन्त्वोषधीः मधुनक्तमुतोषसोमधुमत्पार्थिव९०रजः मधुद्यौरस्तुनःपिता २
मधुमान्नोवनस्पतिर्मधुमां अस्तुसूर्यः माध्वीर्गावोभवंतुनः ३ एतान्प्रसिंचन्पठित्वा अद्येहेत्यादि अमुक
गोत्रोऽस्मत्प्रपितामहश्चादित्यस्वरूपोऽमुकशर्मातृप्यताम् २ तृप्यध्वम् २ इदंजलंसतिलंतस्मैस्वधानमः
अद्येहेत्यादि अमुकगोत्राऽस्मन्माता वसुस्वरूपामुकीदेवीतृप्यताम् २ तृप्यध्वम् २ इदंजलंसतिलंतस्यैस्व
धानमः अद्येहेत्यादिअमुकगोत्रास्मत्पितामहीरुद्रस्वरूपामुकीदेवीतृप्यताम् २ तृप्यध्वम् २ इदंजलंसति
लंतस्यैस्वधानमः अद्येहेत्यादिअमुकगोत्रास्मत्प्रपितामहीआदित्यस्वरूपाअमुकीदेवीतृप्यताम् २ तृप्य
ध्वम् इदंजलंसतिलंतस्यैस्वधानमः ॐनमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यनमोवः पितरोस्वधायैनमोवः पितरोघोरायनमोवः पितरोमन्यवेनमोवः पितरः पितरोनमोवोगृहान्नः पितरो
दत्तसतोवः पितरोदेष्मैतद्वः पितरोवासः १ अद्येहेत्यादि अमुकगोत्रोऽस्मन्मातामहो वसुस्वरूपोमुकशर्मातृ
प्यताम् ३ तृप्यध्वम् ३ इदंजलंसतिलंतस्मैस्वधानमः अद्येहेत्यादि अमुकगोत्रोस्मत्प्रमातामहोरुद्रस्वरूपोमुक
शर्मातृप्यताम् ३ तृप्यध्वम् ३ इदंजलंसतिलंतस्मैस्वधानमः अद्येहेत्यादि अमुकगोत्रोस्मद्वृद्धप्रमातामहो
आदित्यस्वरूपोमुकशर्मातृप्यताम् ३ तृप्यध्वम् ३ इदंजलंसतिलंतस्मैस्वधानमः अद्येहेत्यादि अमुकगोत्रास्म
न्मातामही वसुस्वरूपामुकीदेवीतृप्यताम् ३ तृप्यध्वम् ३ इदंजलंसतिलंतस्यैस्वधानमः अद्येहेत्यादि अमु रामः
कगोत्रास्मत्प्रमातामहीरुद्रस्वरूपामुकीदेवीतृप्यताम् ३ तृप्यध्वम् ३ इदंजलंसतिलंतस्यैस्वधानमः अ ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्येहेत्यादि अमुकगोत्रास्मद्वृद्धप्रमातामही आदित्यस्वरूपा अमुकीदेवी तृप्यताम् ३ तृप्यध्वम् ३ इदंजलं सतिलंतस्यै
स्वधानमः ततः स्त्रीपुत्रभ्रातृपितृव्य आचार्यगुरूपाध्यायस्वसृमातुलशिष्यपितृस्वसृमातृस्वसृश्वसुरादिभ्य ए
कैकांजलिंदद्यात् पुरुषाः सपत्नीकाः सपुत्राः स्त्रियः सभर्तृकाः सपुत्रा ज्ञेया येवांधवा वांधवा वा येन्यजन्मनि
वांधवाः तेसर्वेतृप्तिमायांतु येस्मत्तोयाभिकांक्षिणः आब्रह्मस्तंवपर्यंतं देवर्षिपितृमानवाः तृप्यंतुपितरः स
र्वेमातृमातामहादयः अतीतकुलकोटीनांसप्तद्वीपनिवासिनाम् आब्रह्मभुवनांल्लोकानिदमस्तुतिलोदक
म् इत्येकैकमंजलिंदत्वा येकेचास्मत्कुलेजाता अपुत्रागोत्रिणोमृताः तेगृह्णंतुमयादत्तं वस्त्रनिःपीडितोदक
मितिवस्त्रैकदेशेतिलांजलिर्भूमौप्रक्षेप्तव्यः ततस्तर्पणाकुशान्परित्यज्यहस्तौपादौप्रक्षाल्य उपवीतिमर्वाभि

मुखआचम्यन जलमध्ये चंदनेन पद्माकारं विलिख्य पुष्पैर्ब्रह्मादीन्पूजयेत् तत्र मंत्राः ॐ ब्रह्मयज्ञानं प्रथमं
पुरस्ताद्विसीमतः सुरुचोवेनआवः सबुध्न्या उपमा अस्य विष्ठाः सतश्चयोनिमसतश्चविवः ब्रह्मणेनमः ॐ इ
दं विष्णुर्विचक्रमे त्रेधानिदधे पदं समूढमस्यपांसुरे विष्णवेनमः ॐ नमस्ते रुद्रमन्यव उतोतइषवे न
मः बाहुभ्यामुततेनमः रुद्रायनमः ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यंच हिरण्ययेन
सविता रथेनादेवोयाति भुवनानि पश्यन् ॐ सवित्रेनमः ॐ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि द्यु
म्नंचित्रश्रवस्तमम् ॐ मित्रायनमः ॐ इमम्मेवरुणश्रुधी हवमद्याचमृडय त्वामवस्युराचके ॐ वरुणा रामः
यनमः ॐ अदृश्रमस्यकेतवो विरश्मयो जनाँ अनु भ्राजन्तो अग्नयो यथा उपयाम गृहीतोसि सूर्याय त्वा २१

भ्राजायै स्वने योनिः सूर्याय त्वा भ्राजाय सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम् इत्युत्था
य सूर्यायांजलिं दत्वा ॐ हंसः शुचिषद्वसुरंतरीक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमस
दब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् इति तिष्ठन् सूर्यमुपस्थाय स्वयंभूरसि श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो
मे देहि सूर्यस्यावृतमन्वावर्ते इति प्रदक्षिणीकृत्य आदित्याय नमः इति नमस्कृत्य प्राच्यै दिशे नमः इंद्राय
नमः आग्नेय्यै दिशे नमः अग्नये नमः दक्षिणायै दिशे नमः यमाय नमः नैरृत्यै दिशे नमः निरृतये नमः
प्रतीच्यै दिशे नमः वरुणाय नमः वायव्यै दिशे नमः वायवे नमः उदीच्यै दिशे नमः कुबेराय नमः ईशा
न्यै दिशे नमः ईशानाय नमः ऊर्ध्वायै दिशे नमः ब्रह्मणे नमः अधो दिशे नमः अनंताय नमः ततउप

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्य ॐ ब्रह्मणोनमः ॐ अग्नये ॐ पृथिव्यै ॐ ओषधिभ्यः ॐ वाचे ॐ वाचस्पतये विष्णवेनमः महद्भ्यः अ
द्भ्यः ॐ अपांपतये वरुणाय इतिदेवतीर्थेन संतर्प्य ॐ संवर्चसापयसासंतनूभिरगन्महिमनसासं शि
वेन त्वष्टासुदत्रोविदधातुरायोनुमार्ष्टु तन्वोयद्विलिष्टं इतिजलेनमुखंप्रमार्ज्य देवागातुविद इतिवि
सर्जयेत् ततः करसंपुटं कृत्वा यस्यस्मृत्या चनामोक्त्यातपोयज्ञक्रियादिषु न्यूनंसंपूर्णतांयातिसद्योवं
देतमच्युतम् इतिपठेत् इतितर्पणविधिः ततः सूर्यार्घ्यदानं एहिसूर्यसहस्रांशो तेजोराशेजगत्पते
अनुकंपयमांभक्त्यागृहाणार्घ्यंदिवाकरेति ततस्तीर्थंनमस्कृत्यतीरंप्रक्षाल्यप्रदक्षिणांकृत्वागृहमागत्य रामः
देवपूजांकुर्यात् तदाहयोगी प्रक्षाल्यतीरदेशंतुगत्वास्वंधर्ममाचरेत् तथास्ववंशादिष्वथावम्पसोपा २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नत्कोशसंस्पृशन् आगतः सोदपात्रस्तु यत्नेन शुचिरेव सः अथगृहेदेवार्चनविधिः । यद्यपिपंचानामपिदेवानां
पूजाविधिर्विस्तरेण मंत्रशास्त्रात् स्वस्वगुरुसंप्रदायानुसाराद्वाऊह्य एव तथापिप्रसंगात्सर्वसंप्रदायावि
रोधेनसंक्षेपेण श्रीमद्विष्णुपूजाविधिरुच्यते तत्रगंधपुष्पधूपदीपनैवेद्यादीनिसंभृत्य अद्येहेत्यादि
देशकालौसंकीर्त्य श्रीनारायणप्रीतये यथासंभृतोपचारैर्भगवंतं श्रीलक्ष्मीपतिंपूजयिष्ये इतिसंकल्प्य
स्वशरीरेन्यासविधिंकुर्यात् सहस्रशीर्षा वामहस्ते पुरुषएव दक्षिणहस्ते एतावानस्य वामपादे त्रि
पादूर्ध्व दक्षिणपादे ततोविराड् वामजानौ तस्माद्यज्ञात् दक्षिणजानौ तस्माद्यज्ञात् वामकट्यां तस्मादश्वा
दक्षिणकट्यां तंयज्ञंनाभौ यत्पुरुषं हृदये ब्राह्मणोस्य कंठे चंद्रमा वामबाहौ नाभ्या दक्षिणबाहौ यत्पु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येशामुखे सन्नास्यास नेत्रललाटे यजेनय संस्तृद्धि यथा देहे तथा देवे न्यासं कुर्वीत यत्नतः इति देवशरीरे भाव
नाभ्यर्वं न्यासं कुर्यात् तत्रात्मनो वामभागे पूजा कलशे गंगे च यमुने चेति तीर्थान्यावाह्य गंधादिभिः पूजयेत् स्वा
त्मनो दक्षे शंखं प्रक्षालिताधार पात्रे विन्यस्य जलेनापूर्य ॐ अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः तमी
महे महागयमिति चंदनादिना शंखं संपूज्य प्रार्थयेत् स्वधात्मनः कुमुदकुंदमृणालगौरः शंखो हरेः करत
लांबुजराजहंसः नादेन यस्य सुरशत्रुविलासिनीनां नीवी भवंति शिथिला जघनस्थलीषु १ तदुत्तरः पा
द्यार्घ्याचमनीयपात्राणि सजलानि पूजितानि स्थापयेत् ध्यानम् विष्णुं शारदचंद्रकोटिसदृशं शंखं राम: २२
रथांगं गदामंभोजं दधतं सिताब्जनिलया कांत्या जगन्मोहनम् आबद्धांगदहारकुंडलमहामौलीस्फु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

४ पुरुषएवेदं सर्वं यद्भूतं यच्च भाव्यम्
उतामृतत्वस्येशानो यदन्नेनातिरोहति

१ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्·
सभूमिं सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्·

रत्नांकरां श्रीवत्सांकमुदारकौस्तुभधरं वंदे मुनीड्यं स्तुतम्· २ इति यथाराध्यं ध्यात्वा सहस्रशीर्षेत्यावाहनम्
भगवन्निहागच्छ इह तिष्ठेति आवाहनमुद्रया शालग्रामादौ तु हरिसान्निध्यात्तत्र भावनामात्रं कार्यं आ
गच्छ लक्ष्म्या सह यादवेंद्र गोविंद हृत्पीठमिहाधितिष्ठ गृहाण चर्याविधिना सपर्यां श्रीकृष्ण कुर्यां विधिनो
पचारम् ३ पुरुष एवेति भगवन्नेतत्ते आसनं पुष्पादिना दद्यात् सुवर्णनानाविधरत्नवर्णरोचिः छटा
क्षिप्तत्रस्तांधकारं वीस्तीर्णमेतत्तु मया वितीर्णं नृसिंह सिंहासनमास्पदं च· ४ एतावानस्येति भगवन्
तत्ते पाद्यमिति पादयोर्दद्यात् अमंदमंदारतरुप्रसूनसुगंधसारेण सुरापगायाः भवत्पदांभोजयुगस्य
शंभोस्त्वच्छांभसा क्षालनमाचरामि· ५ त्रिपादूर्ध्व इति भगवन्नेष ते अर्घ्य इति मूर्ध्नि दद्यात् काश्मीरकर्पू

१ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः·
ततो विष्वङ्व्यक्रामत्साशनानशने अभि·

एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोस्य विश्वा
भूतानि त्रिपादस्यामृतं दिवि· ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ ततो विराडजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः।

रपटीरपंकसंस्मरतो तत्तुलसीदलेन· गंगाजलेनार्घ्यमनर्घ्यरत्नपात्रेण पात्रे प्रतिपादयामि ६ ततो विरा
डजायते साचमनं मुखे दद्यात्· रत्नोज्ज्वलायां कनकालुकायां निवेदितं तेनेखिलतीर्थपाद पादार्घ्यदानानु
पादपद्मप्रक्षालनादाचमनं विधेहि ७ अथ तैलहरिद्रादिरुद्वर्तनम्· प्रोत्फुल्लमल्लीसुमनोभरेण सु
वासितस्नेहभरेण विष्णो· वैडूर्यपर्यंकतले कराभ्यां त्वत्पादमुद्वर्तनकं करोमि· ८ ततस्ताम्रपात्रस्थित
शालग्रामादिप्रतिमायां चंदनेन तुलस्या समर्प्य वामहस्तेन गृहीतघंटः शंखोदकेन तस्माद्यज्ञात्सर्वहुतः रा॰म॰
संभृतमिति सर्वांगे स्नापयेत् त्वद्दक्षिणावर्तविलक्षणशंखकुक्षिस्थितेनावरजह्नुजायाः जलेन जात्र २४
तुलसीदलेन श्रीकृष्णदेव स्नपयामि भूयः ९ ततो मार्जनं संशोषितं शोखरवारिवारि सुरानुकूले॰

२ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्· पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे · छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ·

मदुकूलकेन तथा तवांगानि रथांगपाणे संमार्जयाम ऽपुद्गनापटेन १० तस्माद्यज्ञात्सर्वहुत ऋच इति वस्त्रं बाला
वचश्चिकरानेकचोरं राधांगगोरं परिधेहि वासः नवांशुपीतं पि घनेनवीने विरूपतासतु तडिद्विलासः ११ यदि
वस्त्रं न भवति तत्पुष्पादि दद्यात् एवमेव सर्वत्र अथ पुनराचमनम् स्वर्गापवर्गाभोजनतरत्नराशि शृंगारि भंः
गारिकस्य च मुख्यः श्रीवासवासः परिधानपूर्वं देवाद्विरेवाचमनं कुरुष्व १२ तस्मादश्वा इति यज्ञोपवीतम्
मुक्तामयेसूत्रविनिर्मिते देव चारु चामीकरकल्पिते च यज्ञोपवीते तु मयोपनीते प्रीतेन पत्या परिधीयतां ·
ते १३ तं यज्ञमिति गंधं स्वेरेन देहे तव चारुचंद्रकस्तूरिकाकुंकुमसंकुलेन पटीरपंकेन तु निष्कलंकेभा
स्वेन तथा लेपनमाचरामि १४ अथालंकाराः मौलौ किरीटं किल कर्णदेशे निवेशयेकेशव कुंडले च सको

तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः · तेन देवा अयजन्त साध्या ऋषयश्च ये ·

४ · तस्मादश्वा अजायन्त ये के चोभयादतः · गावो ह जज्ञिरे तस्मात्
तस्माज्जाता अजावयः ·

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते

१ ब्राह्मणोस्य मुखमासीद् बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः
पद्भ्यां शूद्रो अजायत

स्तुभं ते हृदये च हारं हरे करे कंकणां करोमि १५ मंजीरकं मंजुलमंघ्रियुग्मे कांचीं नितंबे प्रवलं वयामि रत्नो
ध्रुविभ्राजदनामिकादिद्वये तु मुद्रायुगलं दधामि १६ यत्पुरुषं व्यदधुरिति पुष्पम् मल्लीभवामोल्लितल्लेयदीये
गले च माला तुलसीदलानां यदीयवक्षो वनमालया चितं गृहाण पुष्पाणि मयार्पितानि १७ ब्राह्मणोस्ये
ति धूपम् दशांगधूपेन सगुग्गुलेन साज्येन चामोदकरेण येन कायं त्वदीयं सुरभीकरोमि स्थानं द्वारेणापि
गृहाण तन्मे १८ धूपदीपसमये अन्यानपि नारायणगुणकीर्तनरूपान् श्लोकान् गाथा वा पठेत् चंद्रमा रामः
मनस इति दीपं स्नेहतनपायी मलिनाप्रसंगी निर्वाप्यते वा न समीरणेन प्रदीयते रत्नमयः प्रदीपः श्रीहृ २५
भ्रमते दृप्तिकुलप्रदीप १९ नाभ्या आसीदिति नैवेद्यम् चतुर्विधान्नं सघृतं सुवर्णपात्रे मया देव सम

२ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्

१ चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत श्रोत्राद्वा
युश्च प्राणश्च मुखादग्निरजायत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्पितंते संवीज्यमानोरमयारमेशजुषस्वदेवानुरमयज्ञविनोदैः २० इत्यादिभोजनेपठेत् भोजनमध्येतुसु
रभिशीतलंसुरम्यंजलंनिवेदयेत् नीहारवारंघनसारसारंप्रकल्पितानेकसुगंधिभारं शीतांबुजांबु
नदपात्रवर्तिप्रीतेनपीतांवरपीयतांतत् २१ संप्रत्ययोशानमिदंगृहाणमृदापुनःपाणिमुखंविमृज्य
शलाकयादंतविलंविशोध्यविधेहिशुद्धाचमनंविधेहि २२ स्फुरत्सुगंधकस्तूरिकाचंदनाद्यंकरोद्वर्तने
हस्तदेवार्पयामि यथावर्तनंत्वत्पदांभोजदास्येप्रयच्छप्रसीदप्रभूतप्रभाव २३ ततःप्रजाघाङ्कुराया
र्थतांबूलंदद्यात् कर्पूरकस्तूरिकयानुविद्धंसमग्रसत्खादिरसारसिद्धम् संस्वर्णमुक्ताफलचूर्णयुक्तंतां
बूलवल्लीदलमस्तुतुभ्यम् २४ अथचामरं गंगातरंगावलिनिर्मलाभ्यां विशालवालद्युतिसुंदरा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्यां निबद्धचामीकरचामराभ्यां संवीज्यसे संप्रति दंपतीभ्याम् २५ अथ छत्रं संसक्तमुक्ताफलशोभितां ते शि
रः स्फुरत्कांचनकुंभकांतं सरत्नकार्तस्वरदंडकांडं दधामि ते पांडुरमातपत्रम् २६ अथादर्शः आदर्श एवा
सि जगत्त्रयस्य तथा न वादर्श इदं जगच्च ज्ञात्वापि सेवासमयोचितत्वादादर्शमाद्दस्य तस्य देवः २७ अथ
नृत्यम् नृत्यप्रवीणा वयसा नवीना करांबुजालंबितवेणुवीणाः पुरस्तवैताः सुरवारबाला गायंति गोविं
द गृहीततालाः २८ यत्तु त्वयैतत्प्रदक्षिणत्रयं कार्यं सन्नास्यासन्निति नमस्काराः प्रदक्षिणीकृ
त्य कृतप्रणामस्त्वां प्रार्थये नाथ सकृत्सकामः त्वदीयदासे मयि दाससासे पीयूषवृष्टिं रचलु देहि दृष्टिम् रामः
२९ अज्ञानतो वा नव[illegible]ानतो वा यत्स्वच्युतं कर्म न तद्गुणस्य नाम्नैव पूर्णत्वमुपैति तूर्णम् हेतमावेदय २६

यत्सुहृषं वध्युः कतिधा व्यकल्पयन्
मुखं किमस्यासीत्किं बाहू किमूरू पादाउच्येते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तोवेद्ः ३० अज्ञानतोवापिविजानतोवाराधापनेयद्विविधापराधाः भवंत्वजस्रंमुहिगाःसहस्रंतत्पुंडरीकाक्षम
क्षमस्व ३१ नमत्समःकश्चनपापकर्तानत्वत्समःकश्चनपापहर्ता ज्ञात्वेतिगोविंदप्रदंप्रपन्नाययथोचितं
नाथतथाविधेहि ३२ पृथ्वीतलप्रस्खलितस्यजंतोःप्रायःपृथिव्येवयथावलंवः तथैवनाथत्वयिजा
तमन्योत्वमेवदेवःशरणंममास्ति ३३ इंद्रादिदेवास्तवदेवसेवाविधौनसक्तायतयश्चभक्ताः तत्राधिका
रीविषयानुसारीनरःकथंस्यान्मलमूत्रधारी ३४ किमासनंतेगरुडासनायकिंभूषणंकौस्तुभभूषणा
य लक्ष्मीकलत्रायकिमस्तिदेयंवागीशकिंतेस्तवनंविधेयम् ३५ त्वमेवमाताचपितात्वमेवत्वमेवबं
धुश्चसखात्वमेव त्वमेवविद्याद्रविणंत्वमेवत्वमेवसर्वंममदेवदेव ३६ यज्ञेनयज्ञमपित्सुहासनं

१ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणिप्रथमान्या
सन्.तेहनाकंमहिमानःसचन्तयत्रपूर्वेसाध्याःसन्ति
देवाः।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनःषोडशार्चेनसहस्रशीर्षेत्यादिनास्तुवीत मृदूपधानास्तृततूलिकायामाच्छादक्षौमदुकूलिकायाम् मरी
हत्पंकजकर्णिकायां पर्यंकिकायांसुखमत्रुपेहि ३७ भजस्वदेव्यासहदेवनिद्रामुन्निद्रनीलोत्पलपत्रनेत्रा
पादारविंदंतवमंदमंदंसंवाहयाम्येषसदासदारः ३८ इदंपवित्रंस्यपरंपवित्रंरसायनंचापिरसायनानाम्
दरिद्रताद्दुःखहारिपिवाम्यहंतेपादसरोजवारि ३९ ततःप्रजार्पणकायम् असिनिशितधारंय
स्यचक्रैकराग्रेमणिकनकविचित्रेकुंडलेयस्यकर्णे भ्रमरशतसहस्रैःसेव्यतेयस्यमालाध्वितिजकु
लनिलंताश्रीयतांवासुदेवः ४० इतिपूजाविधिः इदंचपूजनंनद्यादौतर्पणांतंकृत्वागृहमाग रामः
त्यप्रातरेवकार्यम् तदशक्तौगृहेएवसंध्यापूजादिप्रातःकृत्वामध्याह्नसमयेनद्यादौगत्वामध्याह्न- २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संध्यानतर्पणादिकंकुर्यात् रोगादिनोऽथमप्यशक्तो दंतधावनोत्तरं प्रातः संध्यांनिर्मोल्यापसरणमात्रं
चप्रातःकृत्वा मज्जनतर्पणमध्याह्नसंध्यादिकंमध्याह्नेकार्यम् अथमध्याह्नसंध्याविधिः आचमना
दिसर्वंपूर्ववत् विशेषमुच्यते अथसंकल्पः अद्येहोपात्तसकलदुरितक्षयायरुद्रावास्येमध्याह्नसं
ध्योपासनमहंकरिष्ये अथावाहनम् सावित्रीं युवतीं शुक्लां शुक्लवस्त्रांत्रिलोचनाम् त्रिशूलिनीं
वृषारूढां रुद्राणीं रुद्रदेवतां रुद्रेणसेवितांनित्यं रुद्रलोकनिवासिनीम् यजुर्वेदकृतोत्संगां ज
टामुकुटमण्डिताम् कैलासविहितावासामायांतीं सूर्यमण्डलात् वरदां अक्षरां साक्षाद्देवीमावा
हयाम्यहं आगच्छवरदेदेविअक्षरेरुद्रवादिनि सावित्रिछंदसांमातारुद्रयोनेनमोस्तुते आचम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमु ॐ आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु मां पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु मां यदुच्छिष्ट
मभोज्यं च यद्वा दुश्चरितं मम सर्वं पुनंतु मामापो सतां च प्रतिग्रहं स्वाहा निसृत्याविश्या अधोमुखेनाञ्ज
लिना एकमर्घ्यं दद्यात् गायत्रीजपो हृदयसमीपे धृतया लया हस्तेन वा कार्यः अनेनामुकसंख्याके
न गायत्रीजपेन मध्याह्नसंध्यांगभूतेन रुद्ररूपी सविता प्रीणातु इति मध्याह्नसंध्याविधिः अथ वै
श्वदेवविधिः तत्र प्रयोजनमाह मनुः पंचसूना गृहस्थस्य चुल्ली पेषण्युपस्करः कंडनी चोदकुंभश्च ब राम:
ध्यते यास्तु वाहयन् तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः पंच क्लृप्ता महायज्ञाः प्रत्येकं गृहमेधि २८
नाम् एतदकरणे प्रत्यवायमाह स एव देवतातिथिभृत्यानां पितृणामात्मनश्च यः न निर्वपति पंचाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुच्छुसन्नसजीवति अत्र आत्मन इत्यनेन स्वधायरूपोद्गस्य यज्ञउच्यते मनुः एकपाके निवसतो पितृ
देवद्विजार्चनम् एकं भवेद्विभक्तानां तदेवस्याद्गृहेगृहे मार्कण्डेयपुराणे संपूजयेत्ततो वह्निं दद्यादा
हुतयःक्रमादिति अथवैश्वदेवप्रयोगः आचम्यार्घ्यं संस्थाप्य प्राणानायम्य अद्येहेत्यादिदेशका
लौसंकीर्त्य ममपंचसूनाजनितपापक्षयपूर्वक यज्ञेश्वरप्रीत्यर्थं पावकाग्नौ वैश्वदेवमहं करिष्ये इति
संकल्प्य ॐ चत्वारिशृंगास्त्रयो अस्य पादा द्वेशीर्षे सप्तहस्तासो अस्य त्रिधाबद्धो वृषभोरोरवीति म
हो देवो मर्त्यां २ आविवेश ॐ अग्निं प्रज्वलितं वंदे जातवेदं हुताशनम् सुवर्णवर्णममलं समिद्धं
विश्वतोमुखमिति मंत्रांप्यां समिद्धमग्निं प्रतिष्ठाप्य पावकाग्नये नम इति गंधाक्षतादिना संपूज्य प्रा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थयेत् मुखंयः सर्वदेवानां हव्यभुक्कव्यभुक्तथा पितॄणां च नमस्तस्मै विष्णवे पावकात्मने इति प्रार्थ्य जल
लेन पर्युक्ष्य दक्षिणं जान्वाच्य वामहस्तं हृदि निधाय दक्षिणहस्तेन घृताक्तमन्नमग्नौ तदभावे जले जुहुया
त् ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे ॐ प्रजापतये स्वाहा इदं प्रजापतये ॐ गृह्याभ्यः स्वाहा इदं गृह्याभ्यः
ॐ कश्यपाय स्वाहा इदं कश्यपाय ॐ अनुमतये स्वाहा इदमनुमतये ततो हुतशेषान्नेन बलिदानं
ॐ पर्जन्याय नमः इदं पर्जन्याय इति त्यागः एवमग्रेऽपि ॐ अद्भ्यो नमः ॐ पृथिव्यै नमः इत्युदकपात्र रुमः
सन्निधौ ॐ धात्रे ॐ विधात्रे इति द्वार्ययोः वायवे इति प्रतिदिशं प्राच्यै दिशे अवाच्यै दिशे प्रतीच्यै २९
दिशे उदीच्यै दिशे इत्यपि प्रतिदिशम् ॐ ब्रह्मणे अंतरिक्षाय ॐ सूर्याय इति मध्ये ॐ विश्वेभ्यो देवे॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्यो विश्वेभ्योभूतेभ्यो उषसे भूतानांपतये इत्युत्तरोत्तरं न
तः प्राचीनावीती दक्षिणाभिमुखः पातितवामजानुः पितृती
र्थेन दक्षिणस्यांदिशि पितृभ्यःस्वधानमः इदंपितृभ्यःस्व
धा इतिवलिंदत्वा सव्यंविधाय वलिशेषान्नलिप्तमात्रेप्र
क्षाल्य यक्ष्मैतत्तेनिर्णेजनंनम इदंयक्ष्मणे इतिवायव्यां
दिशिदद्यात् गृहद्वारादेशनासंभवेत्वग्नेःपश्चिमतः चतु
रस्रमंडले धात्रादिवलिदाने ततःशेषान्नमादायकिंचित्



Nepal Sa...

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रतः शुचौभूमिभागेभूतेभ्योवलिंदद्यात् तत्रमंत्राः ॐदेवाःमनुष्याःपशवोवयांसिसिद्धाश्चयक्षोरगदैत्यसं
घाः प्रेताःपिशाचास्तरवःसमस्तायेचान्नमिच्छंतिमयाप्रदत्तं इदंदेवादिभ्यः १ पिपीलिकाःकीटपतंगका
द्यावुभुक्षिताःकर्मनिवंधवद्धाः तत्सार्थमन्नोहिमयाप्रदत्तंयेषामिदंतेसुखिनोभवंतु इदंपिपीलिकादिभ्यः
२ ऐंद्रवारुणावायव्यासौम्यायेनैरृतास्तथा वायसाःप्रतिगृह्णंतुभूमौदत्तमिमंवलिम् इदंवायसेभ्यः ३
श्वानौद्वौश्यामशवलौवैवस्वतकुलोद्भवौ ताभ्यांपिंडंप्रदास्यामिस्यातामेतावहिंसकौ इदंश्वभ्याम् ४
इतिवलिंदत्वा हस्तौपादौप्रक्षाल्याचम्यनिवीतीभूत्वा षोडशग्रासमितंचतुर्ग्रासमितंवान्नंगृहीत्वा रामः २०
ॐसनकादिसप्तमनुष्येभ्योहंत इदंसनकादिसप्तमनुष्येभ्यः इति उत्तरादिशिवलिंदद्यात् सर्वनित्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्राद्धम् तत्र एकमप्याशयेद्विप्रंषट्स्वाप्यन्वहं गृही नामंत्रणं नहोमं चनावाहनं नविसर्जनम् नपिण्डदानं
विकरं नचात्र दक्षिणां आवाहनं स्वधाकारं पिंडाग्नौकरणादिकम् ब्रह्मचर्यादि नियमा विश्वेदेवान चैव
हि दातृणामथभोक्तृणां नियमो न च विद्यते आचम्य अर्घ्यं संस्थाप्य तत्र पवित्रेस्थ इति पवित्रं तिलोसीति
तिलान् नूक्षिगंधादिक्षिणाकर्म पात्रं सुसंपन्नं २ तेन जलेनात्मानं संप्रोक्ष्य नित्यश्राद्धसामग्रीं संप्रोक्ष्य
प्राणायामं विधाय पुंडरीकाक्षं संस्मृत्य अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्राणां अस्मत्पितृपि
तामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथामुक गोत्राणामस्मन्मा
तामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां चाक्षयतृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन्पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुंधध्वम्।

त्रिकामनया नित्यश्राद्धमहं करिष्ये इति संकल्प्य देवताभ्यः इति त्रिर्जपः प्राचीनावीती सव्याधेति पठित्वा
अद्येत्यादि पूर्ववत्संकल्पितदशाकमुच्चार्य अस्मिन्नित्यश्राद्धे इदमासनं वस्त्राविमञ्जवः स्वधेति प्राचीनावीती द-
क्षिणाभिमुखः पातितवामजानुः पितृतीर्थेन सजलतिलसमेतं द्विगुणकुशत्रयं दत्वा तत्रैव ॐ पितृभ्यः स्व-
धायिभ्य इति पितृभ्यो वस्त्रं गंधं अक्षतां पत्रिकां पुष्पाणि समर्पयामि नमः इत्यादि मंत्रेण च प्रजपि-
त्वा आसनोपरि अन्नं संस्थाप्य तत्र इदं विष्णुरिति वामांगुष्ठेनाधोमुखेनावगाह्य ॐ अपहता इत्यादि-
ना तिलान्विकीर्य इदमन्नमिमा आपः इदं शाकादिकं सर्वं कव्यं इत्युक्त्वा पूर्ववत् सव्यादि विधाय तिल राम: ३१
कुशजलान्यादाय अद्येत्यादि अमुकगोत्रेभ्य इत्यादिभ्य इत्यादि चतुर्थ्यन्तदशाकमुच्चार्य अस्मिन्नित्य

२ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्· समूढमस्य पांसुरे स्वाहा·

२ अपहता असुरा रक्षांसि वेदिषदः·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्राद्धे इदमन्नं सोपस्करं षड्भा विभज्य वः स्वधेति संकल्प्य सव्येन देवताभ्य इति त्रिजपः अपसव्येन सप्तव्याधेति
पठित्वा पुनः सव्येन मया इदं श्राद्धं विधिहीनमित्यादि विसर्जयित्वा सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः
प्रतिगृह्णन्त्विमं ग्रासं गावस्त्रैलोक्यमातरः सुरभी वैष्णवी माता नित्यं विष्णुपदे स्थिता गोग्रासं तु मया दत्तं
गोविन्दः प्रीयतामिति गोग्रासं दद्यात् तत्र फलमुक्तं भारते घासमुष्टिं परगवे सान्नं दद्यात्तु यः सदा अकृ
त्वा स्वयमाहारं स्वर्गलोकं स गच्छतीति ततः आमा वाजस्येति प्रदक्षिणीकृत्य यस्य स्मृत्वेत्यादि पठित्वा
नैऋत चेवा चं इत्यादि शांतिकाध्यायं पठेत् इति नित्यश्राद्धप्रयोगः एतानि कर्माणि दिने कृतानि रात्रावपि
कार्याणि उक्तं बृहन्नारदीये दिवोदितानि कर्माणि प्रमादादकृतानि वै यामिन्याः प्रहरे यावत्तानि कर्माणि

२ आमा वाजस्य प्रसवो जगम्यादेवे द्यावापृथिवी विश्वरूपे ·
आमा गंतां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्माणिकारयेदिति अथातिथिपूजनं तद्देवमनुष्ययज्ञउच्यते तत्रवसिष्ठः पितृभ्योदद्यात्ततोतिथीन्
जयेत् अतिथिलक्षणमाहपराशरः अचिंतितमनाहूतंदेशकालउपस्थितम् अतिथिंतंविजानीया
न्नातिथिःपूर्वमागतःमार्ययाशुतोयत्रतिष्ठतिसदेशः वैश्वदेवसामीप्यंकालः अध्वनीनोसमानग्रामीण
एकरात्रिकोतिथिरितिलक्षणांतरंचान्यत्र यमः नपृच्छेद्गोत्रचरणंदेशीनामकुलंश्रुतं अध्वनोभ्यागतं
विप्रंभोजनार्थमुपस्थितं चरणंस्वाख्या देशंगोत्रंकुलंविद्यामन्नार्थेयोनिवेदयेत् वैश्वदेवेषुकार्ये
षुवांताशीसनिरुच्यते पराशरः प्रियोवायदिवाद्वेष्योमूर्खःपंडितएववा वैश्वदेवेतुसंप्राप्तेसोतिथिः एमः
स्वर्गसंक्रमः अत्रविशेषमाहशातातपः सर्वस्यदेवतागृहानभ्यागच्छंतियस्यैवंब्राह्मणोविद्वान्गृहमध्ये ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तितमनभ्युत्तिष्ठतः प्रागागतादेवताश्रुपकामेति· आपस्तंबः ब्राह्मणायानधीयानायासनमन्नमुदकमितिदे
येनप्रत्युत्तिष्ठेत· अविभवेसतिमार्कंडेयपुराणे· ग्रासप्रमाणांभिक्षास्यादग्रंग्रासचतुष्टयम्· अग्रंचतुर्गु
णोप्राहुर्हंतकारंद्विजोत्तमाः भोजनंहंतकारंवाअग्रंभिक्षामथापिवा अदत्वातुनभोक्तव्यंयथाविभवमात्म
नः नृसिंहपुराणे भिक्षांचभिक्षवेदद्यात्परिव्राड्ब्रह्मचारिणे कल्पितान्नात्समुद्धृत्यसव्यंजनयुताद
पि यमः हंतदत्ताचयाभिक्षाव्यंजनेसलिलानिच· भोक्ताचभुंजितोयातिदातास्वर्गंनगच्छति· देवलः
सायंप्रातर्गृहद्वारंभिक्षार्थंनावघट्टयेत् विष्णुपुराणे तिथातिथौतुविमुखेगतेयत्पातकंनृणाम्
तदेवाष्टगुणंपुंसांसूर्योढेविमुखेगते· सूर्योढः सूर्यास्तमयसमयागतः अतिथिपूजनफलमाहहर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याति: शीनयेत्स्वागतेनाग्निरासनेनशतक्रतुः पितरःपादशौचेनभोजनेनप्रजापतिः सर्वाटस्जनफल
माहविष्णुः प्रतिश्रयंतथाशय्यांपादाभ्यंगंसदीपकम् प्रत्येकदानेनाप्नोतिगोप्रदानसमंफलम्: क्षत्रि
यादीनामागतेमनुराह ब्राह्मणस्यत्वनतिथिर्गेहेराजन्यउच्यते वैश्यशूद्रौसखाचैवज्ञातयोगुरुरेवच:
यदित्वतिथिधर्मेणक्षत्रियोगृहमाव्रजेत् भुक्तवत्सुतुविप्रेषुकामंतमपिभोजयेत्: वैश्यशूद्रावपिप्राप्तौ
कुटुंबेतिथिधर्मिणौ भोजयेत्सहभृत्यैस्तावानृशंस्यंप्रयोजनम् इतरानपिसख्यादीन्संप्रीत्यागृहमा रामः
गतान् प्रकृत्यान्नंयथाशक्तिभोजयेत्सहभार्यया आनृशंस्यदया नंदिपुराणे कृमिकीटपतंगानांशु ३३
नांचांडाल्यायोनिनाम् दत्वान्नंलोकमाप्नोतिप्राजापत्यंशतंसमाः अतिथ्यादिहीनभोजननिंदमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जावालिः अस्नाताशीमलंभुंक्ते अजपी पूयशोणितम् अहुत्वा च कृमिं भुंक्ते अदत्वा विषभोजनम् अस्थंशाके
वलं भुंक्ते यः पचत्यात्मकारणात् अथ भोजनविधिः तत्र याज्ञवल्क्यः वालस्ववासिनीवृद्धगर्भिण्यातुरकन्य
काः संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभोजनम् व्यासः पंचार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः
हस्तौ पादौ तथा चास्यमेषु पंचार्द्रता मता विशुद्धमपि चाहारं मक्षिकाकृमिजंतुभिः केशरोमनखैर्वापि
दूषितं परिवर्जयेत् पैठीनसिः वटार्काश्वत्थपत्रेषु कुंभितिंदुकजे पि च श्रीकामो न तु भुंजीत कोविदा
रकरंजयोः लवणं व्यंजनं चैव घृतं तैलं तथैव च लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत् ब्रह्मपुरा
णे नसंध्ययोस्तु मध्याह्ने नार्धरात्रे कदाचन नार्द्रवासा नार्द्रशिरा न वायज्ञोपवीतवान् नप्रसारितपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणो भोजनं कुर्वन्नयाचेन्न विगर्हयेत् । जिह्वया च न्यसेदन्नं दंशो केन न संस्पृशेत् इति स्मृत्यंतरे ।

दत्तपादारोपितपाणिना ग्रासशेषं न वा भीयात्पीतशेषं पिबेन्न तु बहूनां भुंजतां मध्ये न चाश्नीयात्त्वरान्वितः
वृथा न विकिरेदन्नं नोच्छिष्टः कुत्रचिद्व्रजेत् शाकमूलफलेक्षूणि दंतच्छेदैर्न भक्षयेत् अपूपकं द मांसादीनामु
पलक्षणमिदम् बहूनां प्रेक्षमाणानां नैकस्मिन्बहवस्तथा शून्यालये वह्निगृहे देवागारे कथंचन शयानः
प्रौढपादस्तु कृत्वा चैवावसक्थिका न भावदुष्टमश्नीयान्नोयं नांजलिना पिबेत् न गोब्राह्मणोपरोधे
श्नीयात् न राजव्यसने नैकोमिष्टं नोद्धृतस्नेहं न दिवा धाना न रात्रौ तिलसंबंधं दधिसक्तून्न कोवि
दारवटपिप्पलशणशाकम् स्वद्वारोऽलेन भुंजीत न चोत्तानः कदाचन । शंखलिखितौ नितिष्ठन्वा रामः
दन्न हसन्न जल्पन्न विलोकयन् इतस्ततः देवलः न भुंजीताघृतं नित्यं गृहस्थो भोजनद्वयं पवित्र ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मथह्यंचसर्पिराहरद्यापरम् नोच्छिष्टोघृतमादद्यान्न चंद्रतारार्कानिरीक्षेतनग्नः स्नानीस्पृशेन्नवस्त्रकी
र्तयेत् ननिःशेषमुक्स्यात् अन्यत्रमधुदधिसर्पिः पयःसक्तुपलतिलोदकेभ्यः बृहस्पतिः नस्पृशेद्वाम
हस्तेनभुंजानोन्नंकदाचन नपादेनशिरोवस्तिनपदाभाजनंस्पृशेत् देवलः एकवस्त्रोनभुंजीत
कपटावपिधायच हारीतः नक्रुद्धोनान्यमना नातिभीषयमाणोश्नीयात् नशिश्नन्निर्भर्त्सयन्
नाप्रादायप्रेक्षमाणेभ्यः ब्रह्मपुराणे ब्राह्मणायाभार्ययासार्धंक्वचिद्भुंजीतचाध्वनि असवर्णाभ्स्त्रि
यासार्द्धंभुक्त्वापततितत्क्षणात् अप्येकपंक्त्यांनाश्नीयात्संयुतःस्वजनैरपि कोहिजानातिकिंकस्य
प्रछन्नंपातकंमहत् भस्मस्तंभजलद्वारमार्गैःपंक्तिंचभेदयेत् भस्मरेखाकरणामुक्तंनत्रैवः चतुरस्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिकोणं च मंडलं चार्द्धचंद्रकम्· कर्त्तव्यमानुपूर्व्वेण ब्राह्मणादिषु मंडलम्· विष्णुपुराणे· अश्नीयात्तन्मना
भूत्वा पूर्वं तु मधुरं रसम्· लवणाम्लौ तथा मध्ये कटुतिक्तादिकं ततः कुर्यात्क्षीरं तमाहारं न च पश्चात्पिवेद्द
धि। जठरं पूर्यते दर्धमन्नैर्भागं जलेन च वायोः संचरणार्थाय चतुर्थमवशेषयेत् इदं च भोजनं मध्या
ह्न एकवारमेव अशक्तौ तु द्विवारमपि तदाह मनुः सायंप्रातर्मनुष्याणामशनं देवनिर्मितं· नांतरा भो
जनं कुर्यादग्निहोत्रसमो विधिः अथ भोजनप्रयोगः अतिथिबालादिषु भुंक्तवत्सु श्वशूद्रादिदृष्टिरहिते
गोमयादि उपलिप्ते कृतचतुरस्रमंडले शुचिदेशे आसने आर्द्रपादः प्रागादिदिक्त्रयमुखोपवि	रामः
ष्टः अंतर्जानुकरः सोत्तरीयः पवित्रपाणी मौनी दक्षिणे धृतजलपात्रो राजनपात्रे परभुक्तिवर्जिते कां	३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कांस्यपात्र इति। इदं च गृहस्थमात्रविषयम्। तन्न्यत्राभोजनं यै व कांस्यपात्रे च भोजनम्। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेदिति पराशरमाधवीये यज्ञो वा कयात्॥

काशीखण्डे तु। भूपतये भुवनपतये भूतानां पतये तथा। प्रदद्यादन्नमग्रे तु स्वाहेत्युक्त्वा बलित्रयमिति। स्वाहाशब्दे नैव बलि
दानं तु न मामाभाति २ बलाद्यपात्रे भोजनं तु गृहस्थयातिविषयम्। ... तारमाधवे। बलाद्य ... पात्रेषु ... मुन्यो दद्यादन्न
... तीना ... मवेदनिष्यां ... र

२१ श्येफलादिपात्रे स्रुवापवित्रं हविष्यान्नमन्नमादाय गायत्र्याभ्युक्ष्य सत्यं त्वर्तेन परिषिञ्चामीति पात्रं परितः प्रद
क्षिणं जलं नीत्वा हस्तेनान्नमभिमंत्र्य अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः एवं ध्यायतु यो भुंक्ते सोन्नदो
षैर्नलिप्यते इति ततः सघृतमोदनमादाय स्वाहाकारेणाहुतित्रयं ॐ भूपतये नमः ॐ भुवनपतये नमः ॐ
भूतानां पतये नमः इति स्वदक्षिणभागे भूमौ दद्यात् ततो जलमादाय ॐ अन्तश्चरसि भूतेषु गुहायां वि
श्वतोमुखः त्वं यज्ञस्त्वं वषट्कारस्त्वं तद्रस्त्वं प्रजापतिः त्वं विष्णोः परमं पदं अमृतोपस्तरणमसि स्वाहे
ति पीत्वा ॐ प्राणाय स्वाहा इति तर्जनीमध्यमाङ्गुष्ठैराहुती मुखे हुत्वा दंतैरस्पृशन्भक्षयेत् ॐ अपाना
य स्वाहेति कनिष्ठानामिकाङ्गुष्ठैः ॐ व्यानाय स्वाहेति मध्यमानामिकाङ्गुष्ठैः ॐ उदानाय स्वाहेति तर्जनीक

परांशरमाधवे शौनकमाह। तर्जनीमध्यमाङ्गुष्ठैर्लग्नाः प्राणाहुतिर्भवेत्॥ मध्यमानामिकाङ्गुष्ठैरपाने जुहुयात्ततः॥ कनिष्ठानामिकाङ्गुष्ठैर्व्या
नेन जुहुयाद्धविः॥ तर्जनीं तु बहिः कृत्वा उदाने जुहुयात्ततः॥ समाने सर्वहस्तेन समुद्रीयाहुतिर्भवेदिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निष्टांगुष्ठैः ॐ समानाय स्वाहेति सर्वांगुलिभिः ततः शेषमन्नं पाणिकंपनमकुर्वन् मुखशब्दमकुर्वन् सर्वांङ्ग
रीत्या सर्वांगुलीभिर्भक्षयेत् कदाचित्केशकीटादि अन्ने दृष्टे चेतावन्मात्रमुद्धृत्य जलेन प्रोक्ष्य भक्षयेत् एवं
सशेषं भुक्त्वा सर्वस्मात्किंचित्किंचित्सकलं हस्ते गृहीत्वा रौरवे पुण्यनिलये पद्मार्बुदनिवासिनाम् प्राणिनां
सी.ए.पुण्या॰ सर्वभूतानामक्षय्यमुपतिष्ठतु इति बलिस्थाने त्यजेत् ततः प्रक्षालितहस्तो जलमादाय ॐ अमृतापिधानम
सि स्वाहेति पिबेत् ततो मृज्जलाभ्यां हस्तशुद्धिं कृत्वा दंतान्काष्ठेन शलाकया वा संशोध्य पादौ प्रक्षाल्य भु
क्तजलेन स्नातो चमनं कृत्वा उदरे हस्तं निधाय अगस्तिं कुंभकर्णं च शनिं च वडवानलं आहारपरिपा राम:
कायस्मरेद्भीमं च पंचममिति अगस्तिर्भीमो वडवानलश्च भुक्तं मयान्नं जरयत्वशेषम् सुखं मम नाम २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रिगामसंभवंयच्छ त्वरोगंममचास्तुदेहे इति च पठेत् भुक्त्वा वह्निमुपस्पृश्य पश्चाच्छनैः शतपदीं व्रजेत् शयीत वाम
भागेन यतो रोगैर्न पीड्यते भूयो प्याचम्य कर्तव्यं ताम्बूलस्य च भक्षणम् श्रवणं चेतिहासस्य ततः कुर्यात्समा
हितः इदं सति संभवे अथोन्यत्नु जीवनवृत्त्यादि द्वितीयतृतीययामौ नयेत् इति भोजनविधिः अथ दिनान्त
रं कर्म तत्र याज्ञवल्क्यः उपास्य पश्चिमां संध्यां हुत्वाग्निं स्तानुपास्य च भृत्यैः परिवृतो भुक्त्वा नातितृप्तोथ सं
विशेत् अथ सायंसंध्याविधिः आचमनादि सर्वं पूर्ववत् विशेषः उच्यते अथ संकल्पः अद्येहेत्यादि
सकलदुरितक्षयाय विष्णुप्रीत्यर्थं सायंसंध्योपासनमहं करिष्ये अथावाहनम् वृद्धां सरस्वतीं कृष्णां पीत
वस्त्रां चतुर्भुजां शंखचक्रगदापद्महस्तां गरुडवाहिनीम् वर्षाश्रमवासां तां आयांतीं सूर्यमण्डलात् सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मवेदकृतोत्संगो वनमालाविभूषितां वैष्णवीं त्र्यक्षरां साक्षाद्देवीमावाहयाम्यहं आगच्छ वरदे देवि त्र्यक्षरे विष्णु
वादिनि सरस्वति छंदसां मातर्विष्णुयोनेनमोस्तुते अथाचमनं अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः
पापेभ्यो रक्षंतां यद्द्न्हा पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुंपतु यत्किंचिद्दु
रितमपि इदमहं मामममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा सायमर्घ्यत्रयम् उपविश्य जपोपस्थाने ज
पस्तु मुखसमीपक्षेतमालया अधोमुखकरेण कार्यः अनेनामुकसंख्याकेन गायत्रीजपेन सायंसंध्यांग
भूतेन विष्णुस्वरूपी सविता प्रीयताम् इति सायंसंध्याविधिः अथ दक्षः प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ राम:
नयेत् यामद्वयं शयानश्च ब्रह्मभूयाय कल्पते अथ शयनविधिः तत्र विष्णुपुराणे कृतपादादिशौच ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुभुक्त्वासायंततोगृही गच्छेदस्फुटितांशय्यामपिदारुमयींनृप सदैवस्वपतःपुंसोविपरीतंतुरोगदं अ
थशयनप्रयोगः पूर्वोक्तशय्यायामेककाष्ठमयायां मृदग्धायां नान्यवर्णोपसेवितायां शुचिरूपायां शुचि
देशस्थापितायां शुचिवस्त्रावृतायां पूर्वोक्तदिक्शिरा शुचिरनार्द्रकरचरणो नग्नो तैलाभ्यक्तशिराशुचि
नि० भार्ययासह पृथग्वास्वपेत् नदेवगृहे नभस्मनदिवानसंध्यायांनशून्यालयश्मशानचतुष्पथसस
र्पगृहकूलमहावृक्षछायालोष्टपाषाणवल्मीकभग्नयक्षाद्यायतनेषुस्वपेत् इदंचशयनं इष्टदेव
तांध्यात्वारामरक्षादिस्तोत्राणिपठित्वागारुडादिमंत्रान्पठित्वाकुर्यात् तेषुमंत्रायथा नर्मदायेनमः
प्रातर्नर्मदायैनमोनिशि नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः सर्पापसर्पभद्रंतेदूरंगच्छमहाविष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जनमेजयस्य यज्ञांते आस्तीकवचनं स्मर आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्त्तते शतधा भिद्यते मूर्द्ध्नि शिंशवृक्षफलं यथेत्यादि नंदिपुराणे नमो नंदीश्वरायेति प्रोक्ता यः सुप्यते नरः तस्य कुष्मांडराजेभ्यो न भयं विद्यते वैभवं अगस्तिर्माधवश्चैव मुचुकुंदो महामुनिः कपिलो मुनिरास्तीकः पंचैते सुखशायिन इति तस्य स्वापस्व
पे दितिशयनविधिः अथ स्त्रीसंगः स च रात्रावेव तत्रापि मध्ययामयोरेव सकृदेव ऋतुकाल एव
तत्रापि चतुर्थरात्रिभिन्नयुग्मासु रात्रिष्वेव स्त्रीहृद्येव श्राद्ध पर्वादिवर्जित एव एकीया यामे वेत्यादि नि
यम प्रयुक्तो वश्यं क्रियमाणो मुख्यतमः अतो स्वेच्छयापि स्त्रियां कामयमानायामनृतावपि वा स्त्रियां एम:
कामयमानायां मृतावयुग्मास्वपि वा सर्वो नियमैः क्रियमाणो मुख्यतरः स्त्रियां कामयमानायामपि च ३८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धारिणा पंचदशरात्रिपर्यंतमजातमैथुनायां आर्द्रपर्वादिदिवसेपि क्रियमाणो मुख्यः ३ ऋतौ स्त्रियां कामयमाना
यामपि चतुर्थरात्रिदिनासक्तकूष्ठ पर्वादिषु चतुर्षु निषिद्धेषु एकतरं निषिद्धं गृहीत्वा क्रियमाणो मध्यमतमः ४
अनृतौ स्त्रियां कामयमानायां ऋतौ स्वेच्छया वा पूर्वोक्तैकतरं निषिद्धं गृहीत्वा क्रियमाणो मध्यमतरः ५ ऋतौ
स्त्रियां कामयमानायां पूर्वोक्तनिषिद्धचतुष्कं गृहीत्वा क्रियमाणो मध्यमः ६ ऋतौ स्वेच्छया अनृतौ स्त्रियां का
मयमानायां वा पूर्वोक्तनिषिद्धचतुष्कं गृहीत्वा क्रियमाणो ऽधमः ७ अनृतौ स्वेच्छया पूर्वोक्तनिषिद्धचतु
ष्कं वर्जयित्वा क्रियमाणो ऽधमतरः ८ अनृतावपि पूर्वोक्तनिषिद्धं गृहीत्वापि स्वेच्छया क्रियमाणो ऽधमत
मः ९ अस्वकीयायां क्रियमाणस्तु परिहार्यः शाश्वत समवर्तुं दवसितं निवासकरणं १० इत्येवं दशविधः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृहस्पतिः ऋतुकालाभिगमनं कुर्यात्पर्वाणि वर्जयेत् लियाष्टकोधिके स्त्री स्यात्पुमांश्चैवाधिके भवेत् तस्मात्पुष्टयर्थं दृष्टकालि षंचभोजयेत् लघ्वाहारं स्त्रियं कुर्यादेवं संजनयेत्सुतम् इति ५

स्त्रीसंगः तत्रादौ गमनमाह याज्ञवल्क्यः षोडशर्तुनिशाः स्त्रीणां तासु युग्मासु संविशेत् तत्र विशेषमाह
व्यासः रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जितः पंचम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः सप्त-
म्यामप्रजा योषिदष्टम्यामीश्वरः पुमान् नवम्यां सुभगा नारी दशम्यां प्रवरः सुतः एकादश्यामधर्म्या
स्त्री द्वादश्यां पुरुषोत्तमः त्रयोदश्यां सुता पापा वर्णसंकरकारिणी धर्मज्ञश्च कृतज्ञश्च आत्मवेदी दृ-
ढव्रतः प्रजायते चतुर्दश्यां पंचदश्यां पतिव्रता आश्रयः सर्वभूतानां षोडश्यां जायते पुमान् ऋ एषः
तुगमनस्यावश्यकत्वमाह यमः ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति घोरायां भ्रूणहत्यायां ३९
पच्यते नात्र संशयः भार्यामृतुमुखे यस्तु सन्निधौ नोपगच्छति पितरः तस्य तं मासं तस्मिन्रेतसि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेरते बौधायनश्च त्रीणिवर्षाण्यृतुमतींयोभार्यांनोपगच्छति सतुल्यंब्रह्महत्यायादोषमृच्छत्यसंशयम्·
ऋतौनोपैतियोभार्यामनृतौयश्चगच्छति तुल्यमाहुस्तयोर्दोषमयोनौयश्चगच्छति· अनेकभार्यस्यर्तु
यौगपद्येकश्यपः यौगपद्येतुतीर्थानांविवाहक्रमशोव्रजेत्· रक्षणार्थमपुत्रोवाग्रहणक्रमशोपिवा·
ग्रहणांश्चतुग्रहणं· सर्वेषामपवादमाहव्यासः व्याधितोवंधनस्थोवाप्रवासेष्वथपर्वसु· ऋतुकाले
पिनारीणांभ्रूणहत्याप्रमुच्यते· वृद्धांवंध्यामसद्वृत्तांमृतापत्यामपुष्पिणीम् कन्यांचवहुपुत्रांचवर्ज
यन्मुच्यतेभयात् वृद्धांगतरजस्कां· दिवापर्वादिषुतन्निषेधमुक्तंशिवरहस्ये· दिवाजन्मदिनेचै
वनकुर्यान्मैथुनंव्रती· श्राद्धंदत्वाचभुंक्त्वाचश्रेयोर्थीनचपर्वसु· रात्रावपितमस्कृदेवकार्यमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्याह याज्ञवल्क्यः सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् अनृतावप्याह गौतमः ऋतावुपेया
त्सर्वत्र वा प्रतिषिद्धवर्जनम्· चतुर्थरात्रावपि नत्याह मरीचिः शुद्धा भर्तुश्चतुर्थेह्नि स्नानेन स्त्री रजस्व
ला· दैवे कर्मणि पित्र्ये च पंचमेहनि शुध्यति· निषेधमुक्तं विष्णुपुराणे नास्नातां तु स्त्रियं गच्छेन्ना
तुरां न रजस्वलाम् नानिष्टां न प्रकुपितां नाप्रशस्तां न गर्भिणीम्· नादक्षिणां नान्यकामां नाका
मां नान्ययोषितम्· क्षुत्क्षामामतिभुक्तां वा स्वयं चैभिर्गुणैर्युतः मनुश्चाह नोपगच्छेत्प्रमत्तोपि
स्त्रियमार्त्तवदर्शने· समानशयने चैव न शयीत तयासह· रजसाभिप्लुतां नारीं मनसाप्युपगच्छतः एमः
प्रज्ञा यशो बलं चक्षुरायुश्चैव प्रहीयते· आर्त्तवदर्शनं ऋतुदर्शनमभिव्याप्य· स्त्रीसंगाद्विहितो ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वंशौचादिमात्रापत्संवः स्त्रीवाससैवसन्निपातःस्याद्यावत्सन्निपातंतयैवसहशय्यानंतोनाना उ
दकोपस्पर्शनमपिनालेपान्नप्रक्षाल्याचम्यप्रोक्षणमंगानामिति स्त्रीवासःस्त्रीसंभोगार्थंवासः स
न्निपातोभिगमः उदकोपस्पर्शनंस्नानं एतदेवव्यक्तमाह धृतशातातपः ऋतौतुगर्भशंकित्वा
त्स्नानंमैथुनिनःस्मृतम् अनृतौतुसदाकार्यंशौचंमूत्रपुरीषवदिति तत्रविशेषमाह सएव
द्वावेतावशुचीस्यातांदंपतीशयनंगतौ शयनादुत्थितानारीशुचिःस्यादशुचिःपुमान् शु
चिःस्नानप्रोक्षणेनविना नतुलेपक्षालनाचमनानिष्टानिरित्याहुः शिष्टाः इतिस्त्रीसंगविधिः
॥ ॥राजच्छत्रमणियोंरिपुयशःप्रतिदिग्विलः॥राजतेमानतोमित्रबुधयोःश्रीत्रिविक्रमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ १ ॥ तदाज्ञाकारिणो विद्वत्कुलोत्त्न निधिशर्मणः ॥ इति संपूर्णतां याता नित्यकर्म प्रकाशि-
का ॥ २ ॥ ॥ इति श्रीमन्महाराजाधिराज पार्वत विषयाधिप श्रीजिविक्रमसेन प्रभ्वाज्ञया कुल
निधिशर्मणा विरचिता नित्यकर्म प्रकाशिका ॥ ॥ स्वस्ति श्रीमन्मङ्गलमूर्त्तये नमः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu